कुरुते तीव्ररुजानां ग्रन्थीनां स्थूलानामणूनां दीर्घवृत्तरक्तानाम्। तदुपतापात् ज्वरातिसार-हिक्का-श्वास-कास-शोष-प्रमोह-वैवर्ण्या-रोचकाविपाकप्रसेकच्छर्द्दिमूर्च्छाङ्गभङ्गनिद्रारतिसदनानि प्रादुर्भवन्त्युपद्रवा एतैरुपद्रवैरुपद्रुतः स च सर्व्वकर्म्मणां विषयम तपतितो वर्ज्जनीयो भवतीति ग्रन्थिविसर्पः ॥ २२ ॥

उपद्रवस्तु रोगोत्तरकालजो रोगाश्रयो रोग एव स्थूलोऽणुर्वा रोगात् पश्चाज्जायते इत्युपद्रवसंज्ञः। तत्र प्रधानं व्याधिर्व्याधेर्गुण-विशेषेण तदुत्सन्नं रक्तं प्रदूष्य श्लेष्माणमनेकधा भिन्दन् स्थूलानामणूनां दीर्घवृत्तरक्तानां तीव्ररुजानां ग्रन्थीनां सिराद्याश्रितं ग्रन्थिविसर्प कुरुते, इमं विसर्पं वाह्याभ्यन्तराश्रितं विद्यात्। तस्येमानि रूपाणि चाह—तदुपतापादित्यादि। ज्वरादिसदनान्ता उपद्रवास्तेषां ग्रन्थीनामुपतापात् प्रादुर्भवन्ति। एतैरुपद्रवैर्ज्वरादिभिरुपद्रुतो ग्रन्थिविसर्पः सर्व्वकर्म्मणां साधनविषयमतिपतितस्ततो विवर्ज्जनीयो भवति। इति ग्रन्थिविसर्प उक्तः ॥ २२ ॥

गङ्गाधरः—ननु यथा वातादिविसर्पाणां रूपाणि भवन्ति यानि तानीवाग्नेय-विसर्पादीनामुपतापाद् यानि भवन्ति किं तानि रूपाण्येवोपद्रवा उच्यन्त इत्यत आह—उपद्रवस्त्वित्यादि। यो यो मूलभूतस्य रोगस्य जन्मन उत्तरकालज एव तद्रोगाश्रयो रोग एव स्थूलोऽभिव्यक्तोऽणुर्वा व्यक्तत्वाभावात् सूक्ष्मः पश्चान्मूलभूतरोगात् पश्चाज्जायते इति स उपद्रवसंज्ञः स्यात्। ननु स कथं चिकित्स्य इत्यत आह—तत्रेत्यादि। तत्र प्रधानं व्याधिस्तस्य प्रधानस्य उत्सन्नरक्तस्येति वृद्धरक्तस्य। शिरास्नाय्वित्यादौ ग्रन्थिविसर्पं कुरुत इति योज्यम्। तेन तीव्ररुजादियुक्तानां ग्रन्थीनां आश्रयं ग्रन्थिविसर्पं कुरुत इत्यर्थः। तदुपतापात् तेन ग्रन्थिविसर्पेण पीड़नात्। सर्व्वकर्म्मणां विषयमतिपतितो भवतीति सर्व्वचिकित्साविषयतामतिक्रान्तो भवतीत्यर्थः। स च शब्देन यथोक्तोपद्रवयुक्त एव ग्रन्थिविसर्पः प्रत्यवमृश्यते। अयञ्च ग्रन्थि-विसर्पस्तन्त्रान्तरे अपचीसंज्ञया कथ्यत इत्याहुः। विसर्पाणां रक्तोपद्रवतया उक्तज्वराद्युपद्रवा ज्ञेयाः ॥ २२ ॥

चक्रपाणिः—उपद्रवस्वरूपं व्याकरोति—उपद्रवस्त्वित्यादि। रोगोत्तरकालजोऽपि रोग-मध्यकालजः। एतेन रोगसहोत्थस्य लिङ्गस्य व्यवच्छेदः। यानि च लिङ्गान्यपि कदाचित् रोगोत्तरकालजानि भवन्ति तानि रोगेण सह प्रायः उत्पद्यमानानि न रोगोत्तरकालजानीत्युच्यन्ते न तेषामुपद्रवत्वम्। रोगाश्रय इति रोगोत्पादकदोषप्रकोपजन्यतया रोगेण समं तुल्यकारणः।

भूत उपद्रवस्तस्य प्रायः प्रधानप्रशमे प्रशमो भवति। स तु पीड़ाकरतरो भवति पश्चादुत्पद्यमानो व्याधिपरिक्लिष्टशरीरधातुकत्वात्। तस्मादुपद्रवः * त्वरमाणोऽभि धावेत्॥ २३॥

सर्व्वायतनसमुत्थं सर्व्वलिङ्गं व्यापिनं सर्व्वधात्वनुसारिणम्

व्याधेर्गुणभूतोऽप्रधानभूत उपद्रवस्तस्य प्रायः प्रधानप्रशमात् प्रशमो भवति। प्राय इति वचनात् क्वचित् प्रधानोपशमेऽपि कस्यचिदुपद्रवस्यानुवृत्तिर्भवति। स तूपद्रवः पीड़ाकरो भवति व्याधितस्य व्याध्युत्पत्तेः पश्चादुत्पद्यमानः क्लेशजनको भवति। कस्मात्? व्याधिपरिक्लिष्टशरीरत्वात्। पूर्व्वोत्पन्नव्याधिना परिक्लिष्टं हि तस्य शरीरं तदुपरि पुनर्व्याध्यन्तरे जाते क्लेशोऽधिकतरो भवति। तस्मात् व्याधिपरिक्लिष्टशरीरत्वात् तं व्याधितमभ्युपद्रवस्तु त्वरमाणोधावेत्। इति कथमनुपक्रम इतिप्रश्नस्योत्तरम्॥ २३॥

<u>गङ्गाधरः</u>—सन्निपातजविसर्पमाह—सर्व्वेत्यादि। सर्व्वेषां वातादिपृथग्दोषजानां यान्यायतनानि निदानानि तेभ्यः समुत्थं जातं विसर्पं सर्व्वलिङ्गम् उक्तवातादिजविसर्पत्रयलिङ्गं सर्व्वाङ्गव्यापिनं सर्व्वधात्वनुसारिणं एतेन गलगण्डोत्पन्नानां ज्वरादीनां रोगोत्तरकालजानामपि उपद्रवत्वं निषेधयति। रोग एवेत्यनेन मूलव्याधेः पृथक् रोगशब्देन व्यवह्रियमाणमुपद्रवं ग्राहयन्ति। तेन व्याध्यवस्थायाः रोगोत्तरकालजरोगाश्रयस्य च व्यवच्छेदं करोति। व्याधेरवश्यम्भावितया मूलव्याधेः स्वरूपत एव उपद्रवोऽवश्यं भवति। यद्यपि केचित् सहबलदोषा व्याधेरुपद्रवा युक्ताः सहोत्पन्नेन च उपद्रवार्थो नास्ति तथापि ये गदा उपद्रवरूपा जायन्ते ते सहोत्पन्नव्याधियोगतया उपद्रवा भण्यन्ते। परमार्थतस्तु सहभाविन उपद्रवा युक्ताः। किन्तु रोगसङ्करत्वेन तत्र जायन्त इति। एतदुपद्रवलक्षणार्थं सुश्रुतः—'तत्रोपसर्गो नाम यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजात उपसर्पति, स न्यून एव, तेनोपद्रवसंज्ञः' इति। उपद्रवप्रकारमाह—स्थूल इति। उपद्रवः संज्ञानिरुक्तिः पश्चाज्जायत इति व्याध्युत्पादसमीपे उपद्रवतीति उपद्रव इति निरुक्तेः। व्याधेर्गुणीभूत इति मूलव्याध्यपेक्षया अप्रधानमित्यर्थः। गुणीभूतत्वे हेतुमाह—तस्य प्रायः प्रधानप्रशमे शम इति। मूलव्याधिप्रशमाधीनशमत्वात् उपद्रवस्याप्राधान्यमित्यर्थः। प्रायःशब्देन च व्यभिचारवाचिना क्वचिदुपद्रवस्य स्वतन्त्रा चिकित्साप्युक्ता। उपद्रवस्य तु आशुचिकित्स्यत्वं दर्शयति। उपद्रवे नितरां क्लेशो भवति। तस्मादित्यादि त्वरया चिकित्सेत्। सा चिकित्सा च मूलव्याधिप्रशमनेन तथा स्वतन्त्रापि भवतीति उक्तमेव॥ २३॥

<u>चक्रपाणिः</u>—सम्प्रति प्रक्रान्तं सन्निपातविसर्पमाह—सर्व्वेत्यादि। सर्व्वायतनसमुत्थमिति

---

* उपद्रवमिति पाठान्तरम्।

आशुकारिणमत्ययकारिणमिति च मत्वा सन्निपातविसर्पम् अचिकित्स्यं विद्यात् ॥ २४ ॥

तत्र वातपित्तश्लेष्मनिमित्ता विसर्पास्त्रयः साध्या भवन्त्यग्नि-कर्द्दमाख्यौ पुनरनुपसृष्टौ मर्म्मण्यनुपहते वा सिरास्नायुमांसक्लेदे साधारणक्रियाभिरुभावेवाभ्यस्यमानौ प्रशान्तिमापद्येयाताम्। अनादरोपक्रान्तः पुनस्तयोरन्यतरो दहेद्देहमाश्वेवाशीविष-विषवत्। तथा ग्रन्थिविसर्पमजातोपद्रवमारभेत चिकित्सितुम्। उपद्रवेणोपद्रुतन्त्वेनं परिहरेत्। सन्निपातजन्तु सर्व्वधात्वनु-

रक्तादिचतुर्द्धातुदूषणपूर्व्वकजातं पश्चान्मेदःप्रभृतिधातून् सरन्तम् आशुकारिणं शीघ्रमारकमत्ययकारिणञ्च मत्वा सन्निपातविसर्पमचिकित्स्यं विद्यादिति सन्नि-पातविसर्प उक्तः ॥ २४ ॥

गङ्गाधरः—ननु के तर्हि विसर्पाः साध्या भवन्तीत्यत आह—तत्रेत्यादि। एकजास्त्रयो विसर्पाः साध्याः। अग्निकर्द्दमाख्यौ तु विसर्पौ यावच्चिकित्स्या-वुक्तौ तयोरपवादोऽयम्। यदि तावनुपसृष्टौ ज्वराद्युपसर्गरहितौ भवतः। मर्म्मणि वक्षसि वाऽनुपहते। सिरादिक्लेदे सति यदि साधारणक्रियाभि-र्दैवव्यपाश्रययुक्तिव्यपाश्रयक्रियाभिरुभौ तावग्निविसर्प-कर्द्दमाख्यविसर्पा-वभ्यस्यमानौ सततमुपचर्य्यमाणौ भवतस्तदा प्रशान्तिमापद्येयाताम्। तयो-रन्यतर आग्नेयो विसर्पः कर्द्दमाख्यो वा यद्यनादरत उपक्रान्तः स्यात् साधारणक्रियाभिर्नोपक्रान्तो भवति, तदाश्वेवाशीविषविषवद्देहं दहेदिति। तथा ग्रन्थिविसर्पमजातोपद्रवं ज्वरातिसाराद्युपद्रवाणामजन्मनि चिकित्सितु-मारभेत तदा प्रशाम्येत्। उपद्रवे जाते त्वेनं ग्रन्थिविसर्पं परिहरेत्। सन्नि-

सर्व्वहेतुभवम्। सर्व्वलिङ्गव्यापिनमिति वातादिजोक्तसर्व्वलक्षणयुक्तम्। सर्व्वधात्वनुसारिणमिति विसर्पाश्रयत्वेनानुक्तानामपि धातूनामाश्रयित्वं दर्शयति। तथाहि मसूरिकायाः एवं तन्त्रान्तरे सकल-धात्वाश्रयत्वमुक्तं तद्वत्सर्व्वतो विसर्पाणां दोषातिमात्रदुष्ट्या सप्तधातुकेतरधातुदुष्टिर्भवतीति ॥ २४ ॥

चक्रपाणिः—मर्म्मणीति हृदयादिमर्म्मणि। साधारणक्रियाभिरिति आरम्भकदोषयोः क्रियाभिः। अभ्यस्यमानाविति सततमुपचर्य्यमाणौ। अनादरीपक्रान्त इति तेन पूर्व्वं सर्व्वथा-नुपक्रमे, अनुपक्रान्त इत्यनेन मारकत्वमुक्तम्। इह तु असम्यगुपक्रम इति विशेषः।

सारित्वादाशुकारित्वाद्विरुद्धोपक्रमत्वाच्चासाध्यं विद्यात्। तत्र साध्यानां साधनविधिमनुव्याख्यास्यामः।

लङ्घनोल्लेखने शस्ते तिक्तकानाञ्च सेवनम्।
कफस्थानगते सामे रूक्षशीतैश्च लेपनम्॥
पित्तस्थानगतेऽप्येतत् सामे कुर्य्याच्चिकित्सितम्।
शोणितस्यावसेकश्च विरेकश्च विशेषतः॥
मारुताशयसम्भूतेऽप्यादितः स्याद्विरूक्षणम्।
रक्तपित्तान्वयेऽप्यादौ स्नेहनं न हितं मतम्॥
वातोल्बणे तिक्तघृतं पैत्तिके च प्रशस्यते।
लघुदोषे महादोषे पैत्तिके स्याद्विरेचनम्॥
न घृतं बहुदोषाय देयं तञ्च विरेचयेत्।
तेन दोषो ह्यवष्टब्धस्त्वङ्मांसरुधिरं पचेत्॥

पातजन्तु विसर्पमसाध्यं विद्यात् सर्व्वधात्वनुसारित्वादिहेतुभ्यः। इति विसर्पनिदानमुक्तम्। अथ किञ्च तत्र भेषजमिति प्रश्नस्योत्तरमाह—तत्र साध्यानामित्यादि। लङ्घनेत्यादि। उल्लेखनं वमनम्। सामे कफस्थानगते विसर्पे रूक्षशीतैश्च वटादिवल्कलैर्लेपनम्। पित्तस्थानगतेऽपि सामे विसर्पे चिकित्सितमेतत् कुर्य्यात्। विशेषतस्तु शोणितस्यावसेकं मोक्षणं विरेकञ्च कुर्य्यात्। मारुतेत्यादि। पक्वाशयसमुद्भूतेऽपि विसर्पे आदितः सामे विरूक्षणं स्यात्। तत्रादौ रक्तपित्तान्वयेऽपि स्नेहनं कर्म्म न हितं भवति। एषु कफादिजातेषु सामत्वाद् यथोक्तमिदं हितम्, न तु दोषभेदेन व्यवस्था भवतीति। वातोल्बणइत्यादि। तिक्तघृतं कुष्ठोक्तं लघुदोषे पैत्तिके वातोल्वणे विसर्पे प्रशस्यते। महादोषे पैत्तिकोल्बणे विसर्पे विरेचनं प्रशस्यते। न घृतमित्यादि। बहुदोषाय मानतो बहुदोषाय न तु सङ्ख्यातः। बहुपरिमितसञ्चितदोषाय

तत्र साध्यनामित्यादिना चिकित्सामाह। उल्लेखनं वमनम्। कफस्थानगत इति ऊर्द्ध्वकायगते। मारुताशयशब्देन च पक्वाशयादधःशरीरं गृह्यते। वातोल्बणे पैत्तिके च तिक्तघृतं प्रशस्यते लघुदोषे इति छेदः। तेन लघुदोषे पैत्तिके इति योज्यम्। बहुदोषायेति पित्तस्य प्रकृतत्वात् बहुपित्तायेत्यर्थः।

तस्माद्विरेकमेवादौ शस्तं दद्याद्विसर्पिणः ।
शोणितस्यावसेकश्च तद्ध्यस्याश्रयसंज्ञितम् ॥
इति वीसर्पिणामुक्तं समासेन चिकित्सितम् ।
एतदेव पुनः सर्व्वं व्यासतः संप्रवक्ष्यते ॥ २५ । २६ ॥
मदनं मधुकं निम्बं वत्सकस्य फलानि च ।
वमनं संविधातव्यं विसर्पे कफपित्तजे ॥
पटोलपिचुमर्द्दाभ्यां पिप्पल्या मदनेन च ।
विसर्पे वमनं शस्तं तथा चेन्द्रयवैः सह ॥
यांश्च योगान् प्रवक्ष्यामि कल्पेषु कफपित्तिनाम् ।
विसर्पाणान्तु योज्यास्ते दोषनिर्हरणाः शिवाः ॥ २७ ॥

विसर्पिणे घृतं न देयं तञ्च विरेचयेत् । कस्मात् ? तेनेत्यादि । हि यस्मात् वहुदोषविसर्पिणो घृतेनावष्टब्ध आवद्धो दोषस्त्वगादीनि पचेत् । तस्मादादौ वहुदोषाय विरेकमेव दद्यात् । शोणितावसेकश्च दद्यात् । कस्मात् ? तद्धीत्यादि । हि यस्मात्तच्छोणितमस्य विसर्पस्य आश्रयसंज्ञितम् । इतीत्यादि । इति वीसर्पिणां चिकित्सितं समासेनोक्तम्, पुनरेवैतत् सर्व्वं व्यासतः सम्प्रवक्ष्यतेऽतःपरमिति शेषः ॥ २५ । २६ ॥

गङ्गाधरः—तत्रोल्लेखनयोगमाह—मदनमित्यादि । विसर्पे कफजे पित्तजे कफपित्तजे च मधुकादीनां कषायं कृत्वा मदनफलवीजानि कल्कीकृत्य मिश्रयित्वा वमनं संविधातव्यम् । पटोलेत्यादि । पटोलपिचुमर्द्दाभ्यां क्वथिताभ्यां मदनेन प्रक्षिप्तेन वमनं पिप्पल्या मदनेन च वमनं शस्तम् । तथेन्द्रयवैः सह मदनेन वमनं शस्तम् । यांश्चेत्यादि । कल्पेषु कल्पस्थाने मदनकल्पादिषु ॥ २७ ॥

तेनेति विरेचनघृतेन । तद्ध्यस्याश्रयसंज्ञितमिति तत् शोणितमस्य विसर्पस्य आश्रयत्वेन कथितम्, तेन शोणितावसेकात् आश्रयोच्छेदेन विसर्पोच्छेदो भवतीत्यर्थः । व्यासत इति विस्तरेण ॥ २५ । २६ ॥

चक्रपाणिः—कफपित्तिनामिति व्यस्तसमस्तकफपित्तजानाम् ॥ २७ ॥

मुस्तनिम्बपटोलानां चन्दनोत्पलयोरपि ।
शारिवामलकोशीर-मुस्तानां वा विचक्षणः ॥
कषायान् योजयेद् वैद्यः सिद्धान् वीसर्पनाशनान् ।
किराततिक्तकं लोध्रं दुरालभां सचन्दनाम् ॥
नागरं पद्मकिञ्जल्कमुत्पलं सविभीतकम् ।
मधुकं नागपुष्पञ्च दद्याद् वीसर्पशान्तये ॥
प्रपौण्डरीकं मधुकं पद्मकिञ्जल्कमुत्पलम् ।
नागपुष्पञ्च लोध्रञ्च तेनैव विधिना पिबेत् ॥ २८ ॥
दुरालभां पर्पटकं गुडूचीं विश्वभेषजम् । *
निशापर्य्युषितं दद्यात् तृष्णावीसर्पनाशनम् ॥
पटोलं पिचुमर्दञ्च दार्व्वीं कटुकरोहिणीम् ।
यष्ट्याह्वं त्रायमाणाञ्च दद्याद् वीसर्पशान्तये ॥ २९ ॥
पटोलादिकषायं वा सर्पिस्त्रिवृतया सह ।
मसूरविदलैर्युक्तं घृतमिश्रं प्रदापयेत् ॥

गङ्गाधरः—मुस्तेत्यादि। मुस्तादीनां त्रयाणां चन्दनाद्योर्द्वयोः शारिवादीनां चतुर्णां वा कषायांस्त्रीन् कषायान् विचक्षणो योजयेत्। किरातेत्यादि। प्रकरणात् किराततिक्तकादीनां दशानां क्वाथं दद्यात्। प्रपौण्डरीकमित्यादि। तेनैव विधिना क्वाथविधिना ॥ २८ ॥

गङ्गाधरः—दुरालभामित्यादि। विश्वभेषजान्तं निशापर्य्युषितं शीतकषायविधिना दद्यात्। पटोलमित्यादि। पटोलपत्रादिकं निशापर्य्युषितं प्रकरणात् ॥२९

गङ्गाधरः—पटोलादीत्यादि। एतत् पटोलादिकषायं सर्पिस्त्रिवृच्चूर्णं तत्र

चक्रपाणिः—किराततिक्तकादिरपि कषायः। तेनैव विधिनेति मुस्तयोगोक्तकषायविधिना ॥ २८ ॥

चक्रपाणिः—निशापर्य्युषितमिति शीतकषायम्। अयञ्च शीतकषायविधिः पटोलमित्यादावपि ग्राह्यः ॥ २९ ॥

---

* द्राक्षां पर्पटकं शुण्ठीं गुडूचीं धन्वयासकमिति पाठान्तरम्।

पटोलपत्रमुद्गानां रसमामलकस्य च ।
पाययेत् तु घृतोन्मिश्रं नरं वीसर्पपीड़ितम् ॥
यच्च सर्पिर्महातिक्तं पित्तकुष्ठनिवर्हणम् ।
निर्दिष्टं तदपि प्राज्ञो दद्याद् वीसर्पशान्तये ॥
त्रायमाणाघृतं सिद्धं गौल्मिके यदुदाहृतम् ।
विसर्पाणां प्रशान्त्यर्थं दद्यात् तदपि बुद्धिमान् ॥ ३० ॥
त्रिवृच्चूर्णं समालोड्य सर्पिषा पयसापि वा ।
घर्म्माम्बुना वा संयोज्य मृद्वीकानां रसेन वा ॥
विरेकार्थं प्रयोक्तव्यं सिद्धं वीसर्पनाशनम् ।
त्रायमाणाश्रृतं वापि पयो दद्याद् विरेचनम् ॥
त्रिफलारससंयुक्तं सर्पिस्त्रिवृतया सह ।
प्रयोक्तव्यं विरेकार्थं विसर्पज्वरशान्तये ॥
रसमामलकानां वा घृतमिश्रं प्रदापयेत् ।
स एव गुरुकोष्ठाय त्रिवृच्चूर्णयुतो हितः ॥ ३१ ॥

प्रक्षिप्य प्रदापयेत्। मसूरविदलैर्युक्तं पटोलादिकषायं घृतमिश्रं प्रदापयेत्। पटोलपत्रेत्यादि। पटोलपत्रमुद्गानां रसं क्वाथं घृतोन्मिश्रम् आमलकस्य वा रसं घृतोन्मिश्रं पाययेत्। यच्चेत्यादि स्पष्टम्। त्रायमाणेत्यादि स्पष्टम् ॥३०॥

गङ्गाधरः—त्रिवृच्चूर्णमित्यादि। त्रिवृच्चूर्णं सर्पिःपयउष्णाम्बुद्राक्षारसान्यतमेन विरेकार्थं प्रयोक्तव्यमिति। त्रायमाणेत्यादि। त्रायमाणाकल्काष्टमांशं चतुर्गुणजले श्रृतं पयो दद्यात्। त्रिफलेत्यादि। त्रिवृतया सह सर्पिस्त्रिफलारससंयुक्तं प्रयोक्तव्यम्। रसमित्यादि। स एवामलकानां रस एव ॥ ३१ ॥

चक्रपाणिः—मसूरविदलैरिति मसूराणां विदलैः। न चात्र विदला श्यामा, तस्याः स्त्रीलिङ्गत्वात् ॥३०

चक्रपाणिः—त्रिफलारसादिभिः समं घृतं देयम्। गुरुकोष्ठाय इति क्रूरकोष्ठाय। दोषपूर्णकोष्ठं गुरुकोष्ठमाहुः ॥ ३१ ॥

दोषे कोष्ठगते भूय एतत् कुर्य्याद् भिषग्जितम्।
शाखादुष्टे तु रुधिरे रक्तमेवादितो हरेत् ॥
भिषग् वातान्वितं रक्तं विषाणेनाभिनिर्हरेत्।
पित्तान्वितं जलौकाभिरलावूभिः कफान्वितम् ॥
यथासन्नं विकारस्य व्यधयेदाशु वा सिराम्।
त्वङ्मांसस्नायुसंक्लेदो रक्तक्लेदाद्धि जायते ॥
एवं निर्हृतदोषाणां दोषे त्वङ्मांससंश्रिते।
आदितो वाल्पदोषाणां क्रिया वाह्या प्रचक्ष्यते ॥ ३२ ॥
उडुम्बरत्वङ्मधुकं पद्मकिञ्जल्कमुत्पलम्।
नागपुष्पं प्रियङ्गुश्च प्रदेहः सघृतो हितः ॥

गङ्गाधरः—दोष इत्यादि। एतदामलकानां रसस्त्रिवृच्चूर्णयुतो भूयो बहुपरिमाणं भेषजं कोष्ठगते दोषे कुर्य्यात्। शाखादुष्टे हस्तपादे दुष्टे रुधिरे रक्तम् आदौ हरेत्। तत्र वातान्वितं रक्तं विषाणेन शृङ्गेण, पित्तान्वितं रक्तं जलौकोभिः, कफान्वितं रक्तमलाबूभिरादितो हरेत्। यथासन्नमित्यादि। व्याधेर्विसर्पस्य यथासन्नमासन्नदेशमनतिक्रम्य सिरां वा व्यधयेत्। व्यधने हेतुमाह—त्वङ्मांसेत्यादि। हि यस्मात् यदि रक्तं न निर्हरेत् तदा तद्रक्तक्लेदात् त्वङ्मांसादिसंक्लेदो जायते। एवमित्यादि। एवमनेन प्रकारेण। अल्पदोषाणामादौ वाह्यक्रिया तूच्यते ॥ ३२ ॥

चक्रपाणिः—दोषे कोष्ठगते भूय इत्यत्र भूयःशब्दः शाखाश्रयदोष वाच्यः। दुष्टरक्ते चिकित्सामाह—शाखादुष्ट इत्यादि। शाखायां दोषे रक्ते च दुष्टे। दोषविशेषेण रक्तावसेकोपायमाह—वातान्वितमित्यादि। रक्तावसेकविशेषविधानं चेह पराधिकारत्वान्नोक्तम्। तच्च सुश्रुते ज्ञेयम्। यथासन्नमिति या विकारप्रत्यासन्ना तां संव्यधयेत्। सिराव्यधश्च सर्व्वसाधारणः। रक्तानपहरणे दोषमाह—त्वङ्मांसेत्यादि। त्वङ्मांसेत्यादौ आदित इति विरेचनशोणितमोक्षणाभ्यां। क्रिया वाह्या इति लेपसेकादिका आह ॥ ३२ ॥

न्यग्रोधपादास्तरुणाः कदलीगर्भसंयुताः।
विसग्रन्थिश्च लेपः स्याच्छतधौतघृतप्लुतः॥
कालेयं मधुकं हेम वन्यं चन्दनपद्मकौ।
पत्रं * मृणालं फलिनी प्रदेहः स्याद्घृतप्लुतः॥
शालूकश्च † मृणालश्च शङ्खं चन्दनमुत्पलम्।
वेतसस्य च मूलानि प्रदेहः स्याद्घृतप्लुतः॥
शारिवा पद्मकिञ्जल्कमुशीरं नीलमुत्पलम्।
मञ्जिष्ठा चन्दनं लोध्रमभया च प्रलेपनम्॥
नलदश्च हरेणुश्च लोध्रं मधुकमुत्पलम्।
दूर्व्वा सर्ज्जरसश्चैव सघृतं स्यात् प्रलेपनम्॥
यावकाः सक्तवश्चोक्ताः सर्पिषा सह योजिताः।
प्रदेहा मधुकं वीरा सघृता यवसक्तवः॥
बलामुत्पलशालूकं वीरामगुरुचन्दनम्।
दद्यादालेपनं वैद्यो मृणालानि विसानि च॥

गङ्गाधरः—उडुम्बरेत्यादि। उडम्बरो यज्ञडुम्बरः। न्यग्रोधपादा इत्यादि। तरुणा न्यग्रोधस्य पादा मूलानि कदलीगर्भः कदल्या वृक्षस्य मध्यस्थः। विसग्रन्थिमृणालग्रन्थिः। कालेयमित्यादि। कालेयं कालीयकाष्ठं हेम नागकेशरपुष्पं वन्यं कैवर्त्तमुस्तकम् मृणालमुशीरम्। शालूकञ्चेत्यादि। शालूकं पद्मादीनां कन्दः मृणालमुशीरं शङ्खं शङ्खग्रन्थिः। वेतसस्य च मूलानीति। शारिवेत्यादि स्पष्टम्। नलदमित्यादि। नलदमुशीरम्। यावका इत्यादि। यावका यवानां सक्तवश्च सर्पिषा सह योजिताः प्रदेहा उक्ताः। मधुकं वीरा शालपर्णी यवशक्तवश्च सघृताः प्रदेहा उक्ताः। बलामित्यादि। उत्पल-

चक्रपाणिः—न्यग्रोधपादा इति न्यग्रोधप्ररोहाः। कदलीगर्भा गर्भस्था कदली। कालेयं कालेयकाष्ठमित्यर्थः। हेम इति नागकेशरचूर्णम्। वन्यं कैवर्त्तमुस्तकम्। शाद्वलं दूर्व्वा।

* एला इति पाठान्तरम्।

† शाद्वलमिति पाठान्तरम्।

यवचूर्णं समधुकं सघृतञ्च प्रलेपनम्।
हरेणवो मसूराश्च समुद्गाः श्वेतशालयः॥
पृथक् पृथक् प्रदेहाः स्युः सर्व्वे वा सह सर्पिषा।
पद्मिनीकर्द्दमः शीतो मौक्तिकं पिष्टमेव च॥
शङ्खः प्रवालाः शुक्तिर्वा गैरिको वा घृतप्लुतः।
पृथगेते प्रदेहाश्च हिता ज्ञेया विसर्पिणाम्॥
प्रपौण्डरीकं मधुकं बला शालूकमुत्पलम्।
न्यग्रोधपत्रं दुग्धीका सघृतं स्यात् प्रलेपनम्॥
विसानि च मृणालानि सघृताश्च कशेरुकाः।
शतावरीविदार्य्योश्च कन्दौ धौतघृतं तथा॥
न्यग्रोधोडुम्बराश्वत्थ-वेतसप्लक्षजाम्बवः।
त्वक्कल्कैर्बहुसर्पिर्भिः शीतैरालेपनं हितम्॥

शालूकं नीलोत्पलस्य कन्दः। वीरां शालपर्णीम्। चन्दनान्त एको योगः। मृणालानि विसानि चेति द्वितीयः। पद्मपुष्पवृन्तं मृणालं क्षुद्रमृणालं कन्दप्रसूतमात्रं विसम्। यवचूर्णमित्यादि। घृतान्त एको योगः। हरेणवो वर्त्तुलकलायाः श्वेतशालयो धवलवर्णशालिधान्यम्। पृथक् पृथक् सह सर्पिषा प्रदेहाः सर्व्वे वा मिलिताः सह सर्पिषा प्रदेहाः स्युः। पद्मिनीत्यादि। पद्मिनीकर्द्दमः पद्मश्रेणितलस्थकर्द्दमः शीत एव, पिष्टं पेषितं मौक्तिकम्, शङ्खादिश्च पिष्ट एव घृतप्लुतः प्रत्येकं प्रदेहः। प्रपौण्डरीकमित्यादि। प्रपौण्डरीकं पौण्डर्य्यम्। विसानीत्यादि। विसादिकन्दान्तं शतधौतघृतयुक्तं प्रलेपनम्। शतावरीत्यादि। धौतघृतं शतधौतघृतमित्यन्त एकयोगः। न्यग्रोधेत्यादि। न्यग्रोधादीनां त्वक् पिष्टो बहुघृतमिश्रः शीतस्तेनालेपनं हितम्।

मृणालसुशीरम्। वीरा विदारीकन्दः। हरेणवो वर्त्तुलकलायाः। श्वेतशालय अकुलित(?)-शुक्लधान्यानि। दुग्धीका स्वनामख्याता। मृणालं पद्मनालिका। वृषपर्णो मूषिकपर्णिका।

शैवालं नलमूलानि गोजिह्वा वृषकर्णिका।
इन्द्राणिशाकं सघृतं * देयं वा दाहशान्तये॥
प्रदेहाः सर्व्व एवैते रक्तपित्तोल्वणे हिताः॥ ३३॥
कफजे तु † प्रवक्ष्यामि प्रदेहानपरान् हितान्।
त्रिफलापद्मकोशीरं समङ्गा करवीरकम्।
नलमूलान्यनन्ता च प्रदेहमुपकल्पयेत्॥
खदिरं सप्तपर्णञ्च मुस्तमारग्वधं धवम्।
कुरुण्टकं देवदारु दद्यादालेपनं हितम्॥
आरग्वधस्य पत्राणि त्वचः श्लेष्मातकस्य च।
इन्द्राणिशाकं काकाह्वां शिरीषकुसुमानि च॥
शैवालं नलमूलानि वीरां गन्धप्रियङ्गुकाम्।
त्रिफलां मधुकं वीरां शिरीषकुसुमानि च॥

Indira Gandhi National
Centre for the Arts

शैवालमित्यादि। वृषकर्णिका सुदर्शना। इन्द्राणिशाकं सिन्धुवारपत्रम्। उदुम्बरत्वगादीनामेतदन्तानामेते सर्व्वे प्रदेहा रक्तपित्तोल्वणे विसर्पे हिताः॥ ३३॥

गङ्गाधरः—कफजे तु विसर्पे प्रदेहान् प्रवक्ष्यामि। त्रिफलेत्यादि। समङ्गा मञ्जिष्ठा। त्रिफलादिभिः सर्व्वैः प्रदेहमुपकल्पयेत्। खदिरमित्यादि। कुरुण्टको नीलझिण्टी। आरग्वधेत्यादि। श्लेष्मातकः शेलुवृक्षः। इन्द्राणिशाकं सिन्धुवारपत्रम्। काकाह्वा काकमाची। शिरीषकुसुमानि द्विरुक्त्या स्वल्पवृहच्छिरीषकुसुमानि। दार्व्वीत्वक् चाभया चेति द्वन्द्वकवद्भावे नपुंसकम्।

इन्द्राणिर्निर्गुण्डी। बलाघृतमिति छेदः। प्लक्षः अल्पदीर्घपत्रः। प्रदेहा इत्यनेन पूर्व्वोक्त-प्रदेहानां भिन्नविषयाणां कफेऽनधिकारात् अपरान् प्रदेहानाह—सकफे त्वित्यादि। अनन्ता उत्पलसारिवा। कुरण्टको म्लानकः। श्लेष्मातको वहुवारक इति प्रसिद्धः। इन्द्राणिशाकं केचित् मत्स्याक्षक इति आहुः। निर्गुण्डीति परे। काकाह्वा गोष्ठोदुम्बरिका गन्धप्रियङ्गुकौ इति

---

* शिरीषत्वग्बलाघृतमिति चक्रधृतः पाठः।　　† सकफे तु इति चक्रसम्मतः पाठः।

प्रपौण्डरीकं ह्रीवेरं दार्व्वीत्वगभयं बलाम्।
पृथगालेपनं दद्याद् द्वन्द्वशः सर्व्वशोऽपि वा॥
प्रदेहाः सर्व्व एवैते देयाः स्वल्पघृतप्लुताः।
वातपित्तोल्बणे ये तु प्रदेहास्ते घृताधिकाः॥ ३४॥
घृतेन शतधौतेन प्रदिह्यात् केवलेन वा।
घृतमण्डेन शीतेन पयसा मधुकाम्बुना॥
पञ्चवल्ककषायेण सेचयेच्छीतलेन वा।
वातासृक्पित्तबहुलं वीसर्पं बहुशः पृथक्॥
सेचना ये प्रदेहास्ते त एव घृतसाधनाः।
तच्चूर्णयोगा वीसर्प-व्रणानामवचूर्णनाः॥
दूर्व्वास्वरससंसिद्धं घृतं स्याद्व्रणरोपणम्।
दार्व्वीत्वङ्मधकं लोध्रं केशरश्चावचूर्णनम्॥

Indira Gandhi National
Centre for the Arts

एषां पृथक् पृथगेकश आलेपनं द्वन्द्वशो वैषामन्यतमयोर्द्वयोरालेपनं सव्वशोऽपि वालेपनं दद्यात्। यथा देयं तदाह—प्रदेहा इत्यादि। त्रिफलादय एतदन्ताः सर्व्वं एव प्रदेहाः कफे स्वल्पघृतप्लुता देयाः। ये प्रदेहा वातपित्तोल्बणे विहितास्ते घृताधिका देयाः॥ ३४॥

गङ्गाधरः—घृतेनेत्यादि। वातरक्तपित्तोल्बणविसर्पं शतधौतघृतेन केवलेन प्रदिह्यात्। घृतमण्डशीतपयःप्रभृतिभिः सेचयेत् पृथगेतानि चत्वारि सेचनानि। सेचना इत्यादि। ये ये सेचना योगास्ते प्रदेहास्त एव घृतसाधनाः। तैर्घृतानि साध्यानि। तच्चूर्णयोगास्तेषां चूणयोगा विसर्पव्रणानामवचूर्णना भवन्ति। दूर्व्वेत्यादि। दव्वांस्वरसे चतुर्गुणे कल्कहीनं पचेद् घृतम्। दार्व्वी-

व्यस्तसमस्तयोगः। सर्व्वएवेत्यत्र एते इति कफविहिताः प्रदेहाः। वातपित्तोल्बण इत्यत्र यद्यपि साक्षात् प्रदेहा न विहिताः तथापि इहैवात्र रक्तपित्तोल्बणे विहितास्तत्रैव द्रव्यगुणतो वातहरद्रव्यकृताधिकाः अधिकसर्पिर्युताः वाते कर्त्तव्या इति ज्ञेयम्॥ ३३।३४॥

चक्रपाणिः—घृतमण्डो घृतसन्तानिकः। पञ्चवल्कं तन्त्रान्तरे उक्तम्—'न्यग्रोधोदुम्बराश्वत्थ-प्लक्ष-वेतसवल्कलैः। सर्वैरेकत्रसंयुक्तैः पञ्चवल्कलमुच्यते'। प्रदेहार्थद्रव्याण्येव परिषेचने घृतसाधने

पटोलं पिचुमर्दश्च त्रिफलामधूकोत्पलम् ।
एतत् प्रक्षालनं सर्पिर्व्रणे चूर्णं प्रलेपनम् ॥ ३५ ॥
प्रदेहाः सर्व्व एवैते कर्त्तव्याः संप्रधावनाः ।*
क्षणे क्षणे प्रयोक्तव्याः सर्व्वमुद्धृत्य लेपनम् ॥
अधावनोद्धृते पूर्व्वे प्रदेहा वहुशोऽघनाः ।
देयाः प्रदेहाः कफजे पर्य्याधानोद्धृते घनाः ॥ † ३६ ॥

त्यादि । दार्व्व्यादिचूर्णमवचूर्णितं व्रणरोपणम् । पटोलमित्यादि । पटोलपत्रादीनां मिलितानां क्वाथेन प्रक्षालनम् । क्वाथकल्काभ्यां पक्वं सर्पिः । चूर्णश्चावचर्णितम् । पिष्ट्वा च तैः प्रलेपनमिति । व्रणरोपणम् ॥ ३५ ॥

गङ्गाधरः—प्रदेहा इत्यादि । यस्मिन् विसर्पे ये प्रदेहास्ते सर्व्व एव क्वाथयित्वा संप्रधावनाः कर्त्तव्यास्ते संप्रधावनाः सर्व्वं प्रलेपनमुद्धृत्य क्षणे क्षणे प्रयोक्तव्याः । पूर्व्वं प्रलेपने अधावनोद्धृते धावनेनानुद्धृते वहुशोऽघनाः प्रदेहास्तनुद्रवप्रदेहा देयाः । कफजे विसर्पे पर्य्याधानस्य चतसृषु दिक्ष लिप्तस्य लग्नस्योद्धृते घनाः प्रदेहा देया इति क्रमः ॥ ३६ ॥

ऽवचूर्णनेऽपि विदध्यात् । दार्व्वीत्यादि एतैर्द्रव्यादिभिः प्रक्षालनक्वाथः कर्त्तव्यः । तथा घृतञ्च अनेनैव तथा चूर्णञ्च प्रलेपनं कर्त्तव्यम् ॥ ३५ ॥

चक्रपाणिः—संप्रसादना इति सवर्णकराः सवर्णत्वे साध्ये कर्त्तव्या इत्यर्थः । किंवा संप्रसादना इति रक्तपित्तप्रसादनाः । तेनायमर्थः । एते रक्तपित्ते प्रदेहाः कर्त्तव्याः य एते कर्त्तव्याः प्रदेहाः उक्तास्ते क्षणे क्षणे पूर्व्वं लेपनमुद्धृत्य प्रयोक्तव्याः । न चिरेण नापि पूर्व्वंप्रलेपनोपरि इत्यर्थः । पूर्व्वं च लेपनमुद्धृत्य कर्त्तव्याः तथा बहुशोऽघनाः प्रतनुका इत्यर्थः । कफप्रदेहानां विशेषमाह—देया इत्यादि । पर्य्याधानोद्धृत इति शुष्कोद्धृते ॥ ३६ ॥

---

* संप्रसादना इति चक्रसम्मतः पाठः ।

† इतः परं केषुचित् पुस्तकेष्वधिकः पाठो दृश्यते—
'त्रिभागाङ्गुष्ठमात्रः स्यात् प्रलेपः कल्कपेषितः । नाति स्निग्धो न रूक्षश्च न पिण्डो न द्रवः समः ॥
न च पर्य्युषितं लेपं कदाचिदवचारयेत् । न च तेनैव लेपेन पुनर्जातु प्रलेपयेत् ॥
क्लेदवीसर्पशूलानि सोष्णभावात् प्रवर्त्तयेत् । लेपो ह्युपरि पट्टस्य कृतः स्वेदयति व्रणम् ॥
स्वेदजाः पिड़कास्तस्य कण्डूश्चैवोपजायते । उपर्य्युपरि लेपस्य लेपो यद्यवचार्य्यते ॥
तानेव दोषान् जनयेत् पट्टस्योपरियान् कृतः । अति स्निग्धोऽतिद्रवश्च लेपो यद्यवचार्य्यते ॥
त्वचि न श्लिष्यते सम्यङ् न दोषं शमयत्यपि । तन्वालिप्तं न कुर्व्वीत संशुष्को ह्यपुटायते ॥
न चौषधिरसो व्याधिं प्राप्नोत्यपि च शुष्यति । तन्वालिप्तेन ये दोषास्तानेव जनयेद् भृशम् ॥
संशुष्कः पीड़येद व्याधिं निस्नेहो ह्यवचारितः ॥ इति

अन्नपानानि वक्ष्यामि विसर्पाणां निवृत्तये।
लङ्घितेभ्यो हितो मन्थो रूक्षः सक्षौद्रशर्करः॥
मधुरः किञ्चिदम्लो वा दाड़िमामलकान्वितः।
सपरूषकमृद्वीकः सखर्ज्जूरः शृताम्बुना॥
तर्पणैर्यवशालीनां सस्नेहा चावलेहिका।
जीर्णे पुराणशालीनां यूषैर्भुञ्जीत भोजनम्॥
मुद्गान् मसूरांश्चणकान् यूषार्थमुपकल्पयेत्।
अनम्लान् दाड़िमाम्लान् वा पटोलामलकैः सह॥
जाङ्गलानाञ्च मांसानां रसांस्तस्योपकल्पयेत्।
रूक्षान् परूषकद्राक्षा-दाड़िमामलकान्वितान्॥
रक्ताः श्वेता महाह्वाश्च शालयः षष्टिकैः सह।
भोजनार्थे प्रशस्यन्ते पुराणाः सुपरिप्लुताः॥

गङ्गाधरः—अथान्नादीन्याह। अन्नेत्यादि। मन्थो द्रवेणालोड़िताः सक्तवः। रूक्षो घृतादिस्नेहरहितो रूक्षद्रव्यकृतसक्तवोऽपि। मधुरो मधुरद्रव्यकृतमन्थो वा दाड़िमादिभिरन्वितः किञ्चिदम्लो वा मन्थो लङ्घितेभ्यो हितः। सपरूषकेत्यादि। परूषकद्राक्षाखर्ज्जूरैः पिष्टैरेतैः सहितो मन्थः शृताम्बुनाऽर्द्धशिष्टजलेनालोड़ितः सक्तुर्लङ्घितेभ्यो हितः। तर्पणैरित्यादि। यवानां शालीनाञ्च तर्पणैर्द्रवद्रव्येणालोड़ितसक्तुभिरवलेहिका सस्नेहा च लङ्घितेभ्यो हितेति लिङ्गविपर्य्ययेण योजना। तस्मिन् मन्थावलेहे जीर्णे पुराणशालीनां भोजनमन्नं यूषैर्भुञ्जीत। यूषार्थमाह—मुद्गानित्यादि। मुद्गादीननम्लान् दाड़िमाम्लान् वा पटोलफलामलकैः सह वा यूषार्थमुपकल्पयेत्। जाङ्गलानामित्यादि। परूषाद्यन्वितान् रूक्षान् घृतादिस्नेहवर्ज्जितान् जाङ्गलमांसरसान् तस्य भोजने चोपकल्पयेत्। भोजनार्थं शालीनाह—रक्ता इत्यादि। रक्ताः शालयः श्वेताः शालयो महाह्वा महाशालयः पुराणाः संवत्सरातीताः। सुपरिप्लुताः

चक्रपाणिः—अन्नपानमाह—जीर्णे इति। अवलेहिकारूपेऽन्ने जीर्णे। जाङ्गलानामित्यादौ रूक्षानित्यनेन स्नेहविरहेण रूक्षमांसकृतत्वेन रूक्षत्वं ज्ञेयम्। रक्ताः श्वेता महाह्वा इति रक्तशालयः श्वेतशालयी महाशालयः। श्वेतशालिर्मागधे पुण्डरीकशालिरिति ख्यातः।

यवगोधूमशालीनां सात्म्यमेव प्रदापयेत्।
येषां नात्युचितः शालिर्नरा ये च कफाधिकाः॥ ३७॥
विदाहीन्यन्नपानानि विरुद्धं स्वपनं दिवा।
क्रोधव्यायामसूर्य्याग्नि-प्रवातांश्च * विवर्ज्जयेत्॥ ३८॥
कुर्य्याच्चिकित्सितादस्माच्छीतप्रायाणि पैत्तिके।
रूक्षप्रायाणि कफजे स्नैहिकान्यनिलात्मके॥
वातपित्तप्रशमनमग्निवीसर्पिणे हितम्।
कफपित्तप्रशमनं प्रायः कर्दमसंज्ञके॥ ३९॥
रक्तपित्तोल्बणं ज्ञात्वा ग्रन्थिवीसर्पमादितः।
विरूक्षणैर्लङ्घनैश्च प्रदेहैः पाश्ववल्कलैः।
सिरामोक्षैर्जलौकाभिर्वमनैः सविरेचनैः॥
शृतैः कषायतिक्तैश्च कालज्ञः समुपाचरेत्॥

जलनार्द्रीकृताः परिपकाः। यवेत्यादि। यवादीनां मध्ये यद् यस्य सात्म्यमभ्यस्तं तत् तेषां प्रदापयेत्। येषां शालिर्नात्युचितो नात्यभ्यस्तः, ये च नराः कफाधिकास्तेषां सात्म्यं प्रदापयेत्॥ ३७॥

गङ्गाधरः—वर्ज्ज्यान्याह विदाहीनीत्यादि। विरुद्धं संयोगविरुद्धम्॥ ३८॥

गङ्गाधरः—कुर्य्यादित्यादि। दोषभेदेन चिकित्सामाह—अस्मादन्नपानात्मकाच्चिकित्सिताच्छीतप्रायाणि त्वन्नपानानि पैत्तिके विसर्पे कुर्य्यात्। रूक्षप्रायाण्यन्नपानानि कफजे कुर्य्यात्। अनिलात्मके स्नैहिकान्यन्नपानानि कुर्य्यात्। अग्निविसर्पिणे वातपित्तप्रशमनं स्नैहिकशीतप्रायं चिकित्सितं हितम्। कफपित्तप्रशमनं शीतरूक्षप्रायं कर्दमविसर्पे हितम्॥ ३९॥

गङ्गाधरः—रक्तपित्तेत्यादि। ग्रन्थिविसर्पे रक्तपित्तोल्बणं ज्ञात्वादितः प्रथमतः विरूक्षणादिभिरुपाचरेत्। पाश्ववल्कलैः प्रदेहैरिति योजना।

यवगोधूमेत्यादि शालिर्महाशालिः, यवगोधूमशालीनां यत् सात्म्यं तदेव प्रयोजयेत्। येषाञ्च शालिर्नात्युचितः नाभ्यस्तः तेषां यवगोधूमावेव ज्ञेयौ। तयोः कफाविरुद्धत्वात् विसर्पहितत्वाच्च। उक्तं हि—'सर्व्वं मधुरं कफकरम् अन्यत्र पुराणयवशालिगोधूमात्' इति॥ ३७॥

* प्रतापानिति वा पाठः।

ऊर्द्ध्वञ्चाधश्च शुद्धाय रक्ते चाप्यवसेचिते ।
वातश्लेष्महरं कर्म्म ग्रन्थिवीसर्पिणे हितम् ॥ ४० ॥
उत्कारिकाभिरुष्णाभिरुपनाहः प्रशस्यते ।
स्निग्धाभिर्वेशवारैर्वा ग्रन्थिवीसर्पशूलिनाम् ॥
दशमूलोपसिद्धेन तैलेनोष्णेन सेचयेत् ।
कुष्ठतैलेन चोष्णेन पक्वक्षारयुतेन* वा ॥
गोमूत्रैः पत्रनिर्य्यूहै रूक्षोष्णैः परिषेचयेत् ॥ ४१ ॥
सुखोष्णया प्रदिह्याद् वा पिष्टया चाश्वगन्धया ।
शुष्कमूलककल्केन नक्तमालस्य चाथवा ।
विभीतकस्य वा ग्रन्थिं कल्केनोष्णेन लेपयेत् ॥

एवमुक्तवमनविरेचनाभ्यामूर्द्ध्वाधःशुद्धाय रक्ते चाप्यवसेचिते सति पित्तरक्तयोः प्रशमने जाते वातश्लेष्मणोः शेषयोर्हरणं कर्म्म ग्रन्थिविसर्पे हितम् ॥ ४० ॥

गङ्गाधरः—उत्कारिकाभिरित्यादि। उत्कारिका यवगोधूमादिचूर्णं जलपक्वा लेहवद्भावे सति भवति। वेशवारो निरस्थिमांसं स्विन्नं कृत्वा पिष्ट्वा गुड़घृतकणामरिचचूर्णयुक्तं कुर्य्यादित्येष वेशवार उच्यते। दशमूलेत्यादि। एवं दशमूलकल्कचतुर्गुणजलेनोपसिद्धेन तैलेनोष्णेन ग्रन्थिविसर्पशूले सेचयेत्। तथा पक्वक्षारयुतेन भस्मीभूतः क्षारः परिस्राव्यः षड़्गुणे जले, ततः पक्वः सन क्षारो भवति तेन युक्तेन कुष्ठतैलेन चोष्णेन शूलशान्त्यर्थं सेचयेत्। गोमूत्रेत्यादि। तथा गोमूत्रैः परिषेचयेत्। एवं रूक्षोष्णैः पत्रनिर्यूहैः क्वाथैः परिषेचयेत ॥ ४१ ॥

गङ्गाधरः—अथ प्रसङ्गाद् ग्रन्थिचिकित्सामाह—सुखोष्णयेत्यादि। अश्वगन्धयेत्यत्र कृष्णगन्धयेति क्वचित् पाठः। शुष्केत्यादि। शुष्कमूलककल्केनोष्णेनाथवा नक्तमालस्य गोकरञ्जकल्केनोष्णेन। एवं विभीतकस्य कल्केनोष्णेन

चक्रपाणिः—विसर्पवर्ज्यानाह—विदाहीनीत्यादि ॥ ३८—४० ॥

चक्रपाणिः—उत्कारिकेत्यादिना उष्णोपनाहमाह—उष्णो बहलो लेपः। पाक्यक्षारयुतेनेति पाकेन सुश्रुताद्युक्तविधानेन कृतः क्षारः पाक्यक्षारः, किंवा पाक्यं पूतिकरञ्जं लवणम्। गोमूत्रैरित्यादौ पत्रम् एरण्डादिकं पत्रम् ॥ ४१ ॥

* पाक्यक्षारयुतेन इति चक्रसम्मतः पाठः।

बलां नागबलां पथ्यां भूर्ज्जग्रन्थिं विभीतकम्।
वंशपत्राण्यग्निमन्थं दद्याद् ग्रन्थिविलेपनम्॥
दन्तीचित्रकमूलत्वक् सुधार्कपयसी गुड़ः।
भल्लातकास्थि कासीसं लेपो भिन्द्याच्छिलामपि।
वह्निमार्गाश्रितं ग्रन्थिं किं पुनः कफसम्भवम्॥ ४२॥
दीर्घकालस्थितग्रन्थिं भिन्द्याद् वा भेषजैरिमैः॥
मूलकानां कुलत्थानां यूषैः सक्षारदाड़िमैः।
गोधूमान्नैर्यवान्नैश्च ससीधुमधुशर्करैः॥
सक्षौद्रैर्वारुणीमण्डैर्मातुलुङ्गरसान्वितैः।
त्रिफलायाः प्रयोगैश्च पिप्पलीक्षौद्रसंयुतैः॥
देवदारुपटुव्योष-प्रयोगैर्गैरिकस्य च।
मुस्तभल्लातसक्तूनां प्रयोगैर्माक्षिकस्य च॥

Indira Gandhi National Centre for the Arts

ग्रन्थिं लेपयेत्। बलामित्यादि। बलादिकं प्रत्येकं ग्रन्थिविसर्प-लेपनं दद्यात्। दन्तीत्यादि। दन्तीमूलत्वक् चित्रकमूलत्वक् स्नुह्यर्कयोः पयसी गुड़ः भल्लातकस्यास्थि कासीसं हिराकस् इति लोके। एषां समानानां लेपो बहल उष्णलेपः शिलामपि भिन्द्यात् कफसम्भवं ग्रन्थिं वह्निमार्गाश्रितं यत् भिन्द्यात् तत् पुनः किम्?॥ ४२॥

गङ्गाधरः—दीर्घेत्यादि। इमैर्वक्ष्यमाणैः। मूलकानामित्यादि। मूलक-कुलत्थयोर्यूषैः सक्षारदाड़िमैरित्येकं भेषजम्। गोधूमान्नैः स्विन्नगोधूम-तण्डुलैर्यवान्नैस्तथाविधैः ससीधुमधुशर्करैरिति द्वितीयम्। सक्षौद्रैर्वारुणीमण्डैः मातुलुङ्गरसान्वितैरिति तृतीयम्। पिप्पलीक्षौद्रसंयुतैस्त्रिफलायाः प्रयोगैश्चतुर्थम्। देवदारु पटु सैन्धवं व्योषञ्चैषां प्रयोगैरिति पञ्चमम्। गैरिकस्य प्रयोगैरिति षष्ठम्। मुस्तादीनां त्रयाणां प्रयोगैः सप्तमम्। माक्षिकस्य प्रयोगैरिति चाष्टमम्।

चक्रपाणिः—नक्तमालं करञ्जकः। विभीतकस्य वेल्यत्र कल्केनेति योज्यम्। दन्तीत्यादौ लेपो भिन्द्यात् शिलामपि स कफग्रन्थिं नितरां भिन्द्यादिति भावः॥ ४२॥

चक्रपाणिः—इमैरिति वक्ष्यमाणैः। गिरिजं शिलाजतु। गिरिजप्रयोगश्च रसायनोक्तो ज्ञेयः।

धूमैर्विरेकैः शिरसः पूर्व्वोक्तैर्गुल्मभेदनैः।
अयोलवणपाषाण-हेमतप्तप्रपीड़नैः॥ ४३॥
क्रियाभिराभिः सिद्धाभिर्विविधाभिर्बली स्थितः।
ग्रन्थिः पाषाणकठिनो यदि नैवोपशाम्यति॥
अथास्य दाहः क्षारेण शरैर्हेम्नाऽथवा हितः।
पाकिभिः पाचयित्वा वा पाटयित्वा समुद्धरेत्॥
मोक्षयेद् बहुशश्चास्य रक्तमुत्क्लेशमागतम्।
पुनरस्य हृते रक्ते वातश्लेष्मजिदौषधम्॥
धूमो विरेकः शिरसः स्वेदनं परिमर्द्दनम्।
अप्रशाम्यति दोषे च पाचनं वा प्रशस्यते॥
प्रक्लिन्नं दाहपाकाभ्यां भिषक् शोधनरोपणैः।
बाह्यैश्चाभ्यन्तरैर्वापि व्रणवत् समुपाचरेत्॥ ४४॥

Indira Gandhi National Centre for the Arts

प्रलेपविधानेन प्रयोगा एते ज्ञेयाः। पूर्व्वोक्तैर्धूमैः शिरसो विरेकैस्तथा गुल्मभेदनैरौषधैस्तथायःपिण्डतप्तपीड़नेन तथा लवणादीनामेकतमतप्तप्रपीड़नैरिमैर्भेषजैर्ग्रन्थिं दीर्घकालस्थितं भिन्द्यादिति योजना॥ ४३॥

गङ्गाधरः—क्रियाभिरित्यादि। स्पष्टम्। अथास्येत्यादि। उक्तक्रियाभिर्ग्रन्थेर्भेदाभावानन्तरं क्षारेण दाहः शरैर्वा हेम्ना वा हितः। पाकिभिर्व्रणशोथोक्तैः। पुनर्बहुशोऽस्योत्क्लेशमागतञ्च रक्तं मोक्षयेत्। पुनरित्यादि। एवमस्य पुनरपि रक्ते हृते वातश्लेष्मजिदौषधं धूमादिकं कार्य्यं प्रशस्यते। धूम इत्यादि। शिरसो विरेको धूमः। परिमर्द्दनमुद्वर्त्तनम्। तथा च दोषेऽप्यप्रशाम्यति सति पाचनं व्रणशोथपाचनं वा प्रशस्यते। प्रक्लिन्नमित्यादि। दाहपाकाभ्यां युक्तं प्रक्लिन्नं ग्रन्थिं बाह्यैः शोधनरोपणैर्वाभ्यन्तरैर्वा शोधनरोपणैर्व्रणवत् समुपाचरेत्॥ ४४॥

मुस्तसक्तवो मुस्तव्योष इत्यादिना कुष्ठोक्ताः। भल्लातकसक्तवो रसायनोक्ताः। अयोलवणेत्यादि तप्तायःप्रभृतिभिः पीड़नैरित्यर्थः॥ ४३॥

* शरैर्लौहेन इति चक्रस्वीकृतः पाठः।

कम्पिल्लकविडङ्गानि त्वचो दार्व्यास्तथैव च ।
पिष्ट्वा तैलं विपक्तव्यं ग्रन्थिव्रणचिकित्सितम् ॥
द्विव्रणीयोपदिष्टेन कर्म्मणा वाप्युपाचरेत् ।
देशकालविभागज्ञो व्रणान् वीसर्पजान् बुधः ॥ ४५ ॥
य एव विधिरुद्दिष्टो ग्रन्थीनां विनिवृत्तये ।
स एव गलगण्डानां कफजानां निवृत्तये ॥
गलगण्डास्तु वातोत्था ये कफानुबला नृणाम् ।
घृतक्षीरकषायाणामभ्यासान्न भवन्ति ते ॥ ४६ ॥
यानीह कर्म्माण्युक्तानि विसर्पाणां निवृत्तये ।
एकतस्तानि सर्व्वाणि रक्तमोक्षणमेकतः ॥
विसर्पो नह्यसंसृष्टो रक्तपित्तेन लक्ष्यते ।
तस्मात् साधारणं सर्व्वमेतदुक्तं चिकित्सितम् ॥

Indira Gandhi National

गङ्गाधरः—कम्पिल्लेत्यादि । कम्पिल्लकविडङ्गदार्व्वीत्वग्भिः कल्कैश्चतुर्गुणजले तैलं पक्त्वा ग्रन्थिव्रणे दद्यात् । अपरश्चाह द्विव्रणीयेत्यादि । स्पष्टम् ॥४५॥

गङ्गाधरः—चिकित्सिततुल्यत्वादाह—य एवेत्यादि । ग्रन्थीनां वीसर्पाणाम् एष य एव विधिरुद्दिष्टः, स एव विधिः कफजानां गलगण्डानां निवृत्तये कार्य्यः । गलगण्डा इत्यादि । ये कफानुबला वातोत्था गलगण्डास्ते घृतादीनामभ्यासात् न भवन्ति ॥ ४६ ॥

गङ्गाधरः—यानीत्यादि । इह विसर्पाणां निवृत्तये यानि कर्म्माण्युक्तानि तानि सर्व्वाणि कर्म्माण्येकतः एकस्यां दिशि वर्त्तन्ते । एकं रक्तमोक्षणमेकतो वर्त्तते । कस्मात् ? विसर्पो न हीत्यादि । हि यस्माद् विसर्पो रक्तपित्तेनासंसृष्टो न लक्ष्यते सर्व्व एव विसर्पो रक्तपित्तेन संसृष्ट एव लक्ष्यते, तस्मात् साधारणं

चक्रपाणिः—पाक्तिभिरिति पाचनपिण्डैः । पुनश्चेत्यादिना उक्ता अपि धूमादयः पुनः अपनीतग्रन्थिविषयतया विधीयन्ते, तेन चेह न पुनरुक्तिः ॥ ४४ । ४५ ॥

चक्रपाणिः—ग्रन्थिव्रणचिकित्सिते यदुक्तं तदेवातिदिशन्नाह—य एवेत्यादिना । गलगण्डानामिति बहुवचनानि गलगण्डगण्डमालाऽपचीविवक्षितानि ॥ ४६ ॥

विशेषदोषवैशेष्यान्न च नोक्तः समासतः।

समासव्यासनिर्द्देशैरुक्तञ्चैतच्चिकित्सितम् ॥ ४७ ॥

तत्र श्लोकाः।

निरुक्ता नामभेदाश्च दोषा दूष्याश्च हेतवः।

आश्रयो मार्गतश्चैव विसर्पगुरुलाघवम् ॥

लिङ्गान्युपद्रवा ये च यल्लक्षण उपद्रवः।

साध्यत्वं न च साध्यत्वं साधनञ्च यथाक्रमम् ॥

इति पिप्रीषवे * सिद्धमग्निवेशाय धीमते।

पुनर्व्वसुरुवाचेदं वीसर्पाणां चिकित्सितम् ॥ ४८ ॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृतेऽप्राप्ते दृढ़बलप्रतिसंस्कृते चिकित्सितस्थाने विसर्परोगचिकित्सितं नाम एकविंशोऽध्यायः ॥ २१ ॥

वातपित्तकफरक्तसाधारणमेतच्चिकित्सितमुक्तं दोषवैशेष्यान्न च विशेष उक्तः। न च समासतोऽप्युक्तः। समासव्यासनिर्द्देशैश्चिकित्सितञ्चैतदुक्तमिति ॥४७॥

गङ्गाधरः—अध्यायार्थमाह—तत्र श्लोका इति। निरुक्ता इत्यादि। पिप्रीषवे प्रेतुमिच्छवे ॥ ४८ ॥

अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते। अप्राप्ते तु दृढ़बलप्रतिसंस्कृत एव च।
चिकित्सिते विसर्पाणामध्याये त्वेकविंशके। वद्यगङ्गाधरकृते जल्पकल्पतरौ पुनः।
चिकित्सास्थानजल्पे तु षष्ठस्कन्धे विसर्पिणाम्।
चिकित्सितजल्पो नाम शाखेयमेकविंशिकी ॥ २१ ॥

चक्रपाणिः—विसर्प रक्तमोक्षणस्तुतिमाह—यानीत्यादि। रक्तमोक्षणे एव कुतः प्राधान्यमित्याह—विसर्पो नेत्यादि। साधारणमिति वातकफविसर्पे रक्तपित्तहरं चिकित्सितं युक्तमित्यर्थः ॥ ४७ ॥

चक्रपाणिः—निरुक्तमित्यादिसंग्रहः। यल्लक्षण उपद्रव इति यादृकलक्षणेनोपद्रवेण न साध्यमित्यर्थः। पिप्रक्षवे प्रष्टुमिच्छवे ॥ ४८ ॥

इति महामहोपाध्याय-चरकचतुरानन-श्रीमच्चक्रपाणिदत्तविरचितायामायुर्व्वेददीपिकायां चरकतात्पर्य्यटीकायां चिकित्सितस्थानव्याख्यायां विसर्पचिकित्सितं नाम एकविंशोऽध्यायः ॥ २१ ॥

---

* पिप्रक्षवे इति चक्रसम्मतः पाठः।

द्वाविंशोऽध्यायः ।

अथातस्तृष्णाचिकित्सितं व्याख्यास्यामः,

इतिह स्माह भगवानात्रेयः ॥ १ ॥

ज्ञानप्रशमतपोभिः ख्यातोऽत्रिसुतो जगद्धितेऽभिरतः ।
तृष्णानां प्रशमार्थं चिकित्सितं प्राह पञ्चानाम् ॥ २ ॥
क्षोभाद् भयाच्छ्रमादपि शोकात् क्रोधाद् विलङ्घनान्मद्यात् ।
क्षाराम्ललवणकटुकोष्णरूक्षशुष्कान्नसेवाभिः ॥
धातुक्षयगदकर्षणवमनाद्यतियोगसूर्य्यसन्तापैः ।
पित्तानिलौ प्रवृद्धौ सौम्यं धातुं विशोषयतः * ॥

<u>गङ्गाधरः</u>—उद्दिष्टक्रमादेतदध्यायानन्तरं तृष्णाचिकित्सितमाह—अथात इत्यादि । सर्व्वं पूर्व्ववद् व्याख्येयम् ॥ १ ॥

<u>गङ्गाधरः</u>—ज्ञानेत्यादि । अत्रिसुतः कृष्णात्रिपुत्रः पुनर्व्वसुः । पञ्चानां तृष्णानाम् । अष्टोदरीये प्रागुक्तं पञ्च तृष्णा इति । पञ्च तृष्णा इति वातपित्तामक्षयोपसर्गात्मिका इति । तासां पञ्चानां तृष्णानामिति ॥ २ ॥

<u>गङ्गाधरः</u>—क्षोभादित्यादि । क्षुभसञ्चलने मनःशरीरयोः क्षोभः क्लेशजनकचालनम् । क्षाराम्लादिशुष्कान्नसेवाभिः । गदकर्षणं रोगान्तरेण कर्षणम् ।

<u>चक्रपाणिः</u>—विसर्पे प्रायेण तृष्णा उपद्रवरूपा भवति इति विसर्पानन्तरं तृष्णाचिकित्सितमुच्यते ॥ १ ॥

<u>चक्रपाणिः</u>—ज्ञानं विज्ञानम् । प्रशमः शान्तिः । तपश्चान्द्रायणादि । चिकित्सितं चिकित्साविधायको ग्रन्थः । निदानाद्यभिधानञ्च चिकित्सार्थमेव निदानादिज्ञानपूर्व्वकत्वाच्चिकित्सायाः । पञ्चानामिति वचनेन पञ्चानामपि चिकित्साविषयत्वं दर्शयति । न हि कासश्वासवदस्यासाध्यत्वम् । तथा सुश्रुतोक्तनिरुक्तिः पञ्चस्वपि तृष्णासु भवति । उक्तं हि सुश्रुते—'तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात् तथाह्यामसमुद्भवा च । स्यात् सप्तमी भक्तनिमित्तजा चे'ति ॥ २ ॥

<u>चक्रपाणिः</u>—क्षोभादित्यादुक्तनिदानस्य योगात् वातपित्तकर्त्तृत्वं चोन्नेयम् । पित्तानिलाविति सर्व्वतृष्णासम्प्राप्तिग्रन्थः । सौम्यान् धातूनिति सोमगुणातिरिक्तान् । प्रदूषयतः इति

---

* सौम्यान् धातून् प्रदूषयतः इति चक्रसम्मतः पाठः ।

Indira Gandhi National Centre for the Arts

रसवाहिनीश्च धमनीर्जिह्वामूलगलतालुकक्लोम्नः।
संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलां तौ॥
पीतं पीतं हि जलं शोषयतस्तावतिबलौ न याति शमम्।*
घोरा व्याधिकृशानां प्रभवत्युपसर्गभूता सा॥ ३॥
प्राग्रूपं मुखशोषः स्वलक्षणं सर्व्वदाम्बुकामित्वम्।
तृष्णानां सर्व्वासां लिङ्गानां लाघवमपायः॥ ४॥

वमनादि वमनविरेचनादि संशोधनम्। सौम्यं धातुं कफरसादिकम्। रसवाहिनीर्धमनीर्जिह्वामूलादींश्च शोषयतः पित्तानिलौ। क्लोम कण्ठोरसोः सन्धिः। एतान् सौम्यधातुरसवाहिधमन्यादीन् संशोष्य तौ पित्तानिलौ नृणां देहेऽतिबलां तृष्णां कुरुतः। तावतिबलौ पित्तानिलौ नृभिः पीतं पीतं जलं हि यस्माच्छोषयतः। एवं जाता च सा तृष्णा न शमं याति। व्याधिकृशानां घोरा भयानिकोपसर्गभूता प्रभवति॥ ३॥

गङ्गाधरः—तस्याः प्राग्रूपमाह—प्राग्रूपमित्यादि। मुखशोषः सर्व्वासां तृष्णानां प्राग्रूपं भवति। सर्व्वासां तृष्णानां स्वलक्षणं सर्व्वदाम्बुकामित्वम्। सर्व्वासां तृष्णानां लिङ्गानां स्वस्वलिङ्गानां लाघवमपाय इति लाघवपदेन स्वाभाविकतृष्णाव्यवच्छेदः॥ ४॥

षोड़शांशेन दूषयतः। (द्वितीयाबहुवचनान्तम्।) देह इत्यनेन एतासां तृष्णानां शरीरद्वयं दर्शयति। या हि मानसी तृष्णा सा शरीरे इच्छाद्वेषात्मिका दुःखात् प्रवर्त्तते इति। या तु देहाश्रयदोषकारणा सा देहजेति भावः। स्वाभाविकतृष्णा यापि वातपित्ते आरम्भे एव, किं साप्यत्र न गृह्यते? मैवम्, इह अस्वाभाविकव्याधिप्रकरणे नाधिकार इति कृत्वा स्वाभाविकतृष्णाकरवातपित्ताभ्यां वक्ष्यमाणतृष्णाकरवातपित्तानां विशेषमाह—पीतं पीतमित्यादि। प्रकृततृष्णारम्भकौ पित्तवातौ पीतं पीतं जलं शोषयतः। अतो जलशोषणत्वात् शमं न याति। स्वाभाविक्यां जलं पीत्वा शान्तिमधिगच्छतीति भावः। उपद्रवरूपतृष्णोत्पादमाह—घोरेत्यादि। उपसर्गभूतेति उपद्रवरूपा॥ ३॥

चक्रपाणिः—तृष्णाप्राग्रूपमाह—प्राग्रूपमित्यादि। प्राग्रूपकथने एव मध्ये तृष्णानामव्यभिचारिलक्षणमाह—स्वलक्षणमिति। अव्यभिचारिलक्षणं यथा ज्वरस्य सन्तापः। पुनः प्रकृतं प्राग्रूपमाह। लिङ्गानां लाघवमिति वक्ष्यमाणवातादिजतृष्णालिङ्गानां अल्पत्वम्। पूर्व्वरूपावस्थायां वक्ष्यमाणलक्षणानि कानिचिच्च न भवन्त्येव। उक्तञ्च—'अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम्' इति। किंवा यदेतत् प्राग्रूपं मुखशोषः सर्व्वदाम्बुकामित्वम्, एतच्च स्वलक्षणं

* तावतो न याति शममिति चक्रसम्मतः पाठः।

मुखशोषस्वरभेदभ्रमसन्तापप्रलापसंस्तम्भान्।
ताल्वोष्ठकण्ठजिह्वाकर्कशतां चित्तनाशञ्च ॥
जिह्वानिर्गममरुचिं बाधिर्य्यं मर्म्मदूयनं सादम्।
तृष्णोद्भूता कुरुते पञ्चविधा लिङ्गतः शृणु ताः ॥ ५ ॥
अब्धातं देहस्य कुपितः पवनो यदा विशोषयति।
तस्मिन् शुष्के शुष्यत्यबलस्तृष्यत्यथ विशुष्यन् ॥
निद्रानाशः शिरसो भ्रमस्तथा शुष्कविरसमुखता च।
स्रोतोऽवरोध इति च स्याल्लिङ्गं वाततृष्णायाः ॥ ६ ॥

गङ्गाधरः—तृष्णायाः प्राबल्ये सामान्यलक्षणमाह—मुखशोषेत्यादि। उद्भूता प्रबला तृष्णा मुखशोषादीन् ताल्वादिककर्कशतां चित्तनाशञ्च जिह्वानिर्गमं बहिर्निःसरणं मर्म्मदूयनं वक्षस उपतापं कुरुते पञ्चविधास्ताः प्रागभिहिताः वातपित्तामक्षयोपसर्गात्मिकास्तृष्णाः शृणु। ननु अन्यत्र सप्त तृष्णा अभिहिताः, तद्यथा। तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात् तथा ह्यामसमुद्भवा च। भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्व्वशश्चेति। कथमिह पञ्च तृष्णा इति? उच्यते। वक्ष्यते ह्यत्रैव प्रतितृष्णं कारणं ततो नाधिकास्ति तृष्णा ॥५॥

गङ्गाधरः—वाततृष्णालक्षणमाह—अब्धातुमित्यादि। कुपितः पवनो यदा देहस्याब्धातु विशोषयति तदा तस्मिन्नब्धातौ शुष्के सति अबलः पुमान् शुष्यति चाथ विशुष्यन् तृष्यति। तस्य निद्रानाशादीनि च स्युः। स्रोतोऽन्न-जलवहं तस्यावरोधः इति च वाततृष्णाया लिङ्गम् ॥ ६ ॥

तृष्णानां, तथा पूर्व्वरूपञ्च भवतः। ये तु प्राग्रूपं मुखशोषः सर्व्वदाम्बुकामित्वमिति पठन्ति, तेषां मते तृष्णायाः स्वलक्षणं नोक्तं स्यात्। उक्तञ्च—'स्वलक्षणन्तु तृष्णानां सर्व्वदाम्बु-पिपासिते'ति। किंवा मुखशोषे एव सर्व्वदाम्बुकामित्वं लिङ्गानाञ्च लाघवं रोगरूपाया-स्तृष्णाया आगमनमित्यर्थः। तृष्णानां त्वुपरमो वक्ष्यमाणलिङ्गानामन्यथात्वम्। सर्व्वदोच्छेदो हि तृष्णालक्षणानां न भवत्येव। सहजतृष्णाग्रस्तत्वेन तल्लक्षणानां अल्पमात्रतयावस्थानात्। लिङ्गानां लाघवमाशूत्पादः। अपायो मरणमिति कृत्वा तृष्णानामसाध्यतालक्षणमिदमुच्यते ॥ ४ ॥

चक्रपाणिः—सर्व्वतृष्णानामुपद्रवानाह—मुखशोष इत्यादि। ये तु मुखशोषादीनि लक्षणा-न्याहुस्तन्मते तृष्णोपद्रवानभिधानं स्यात्। उपद्रवाश्चाध्यायसंग्रहे संगृहीताः तेनातिशयवृद्धाः मुखशोषादय उपद्रवाः। वृद्धास्तु लिङ्गानीति व्यवस्था ॥ ५ ॥

चक्रपाणिः—अब्धातुमित्यादिना पञ्चानां पृथक् सम्प्राप्तिमाह। कुपितः पवनः देहे नाना-रसादिरूपतया स्थितं अब्धातु विशोषयति, शुष्केऽब्धातौ शुष्यतीति योज्यम्। स्रोतोवरोध इति प्रत्युपघातः ॥ ६ ॥

पित्तं मतमाग्नेयं कुपितं चेत् तापयत्यब्धातुम्।
सन्तप्तः संजनयेत् * तृष्णां दाहोल्बणां नृणाम्॥
तिक्तास्यत्वं शिरसो दाहः शीताभिनन्दता मूर्च्छा।
पीताक्षिमूत्रवर्च्चस्त्वमाकृतिः पित्ततृष्णायाः॥ ७॥

गङ्गाधरः—पित्ततृष्णालक्षणमाह—पित्तमित्यादि। आग्नेयमग्निस्तेजोनामभूतं तद्बहुलपाञ्चभौतिकं मतम्, तच्चेत् कुपितमब्धातुं तापयति, स सन्तप्तोऽब्धातुर्नृणां दाहोल्बणां तृष्णां सञ्जनयेत्। तेषां नृणां तिक्तास्यत्वादीनि च स्युः। पित्ततृष्णाया आकृतिरिति। इह अब्धातुं चेत् कुपितं पित्तं तापयतीति यदुक्तं तेन कुपितपित्तसन्तप्तः कफोऽप्यब्धातुस्तृष्णां संजनयेदिति ख्यापितम्। तस्याः सम्प्राप्तिरियमुक्तान्यत्र। वाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलाशेन भवेत् तथा च। निद्रागुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रमिति॥ न ततोऽधिकसङ्ख्यास्तृष्णायाः। एतदभिप्रायेणैव हारीतेनाप्युक्तम्—स्वाद्वम्ललवणाजीर्णैः क्रुद्धः श्लेष्मा सहोष्मणा। प्रपद्याम्बुवहं स्रोतस्तृष्णां संजनयेत् नृणाम्। शिरसो गौरवं तन्द्रा माधुर्य्यं वदनस्य च। भक्तद्वेषः प्रसेकश्च निद्राधिक्यं तथैव च। एतैर्लिङ्गैर्विजानीयात् तृष्णां कफसमुद्भवामिति। दोषतारतम्यन्तु नेह तन्त्रे विशेषेणोक्तम्। पित्तप्रधानत्वेऽब्धातुसन्तापे दाहोल्बणादितृष्णा भवति। अप्रधानंपित्ततापितेऽब्धातौ खलु कफादौ हारीतोक्तलक्षणा तृष्णा भवतीति कफजव्यपदेशो हारीतादिना कृतोऽस्मिंस्तु तन्त्रे पित्तजायामन्तर्भाव इति अभिप्रायभेदान्न विरोधः॥ ७॥

चक्रपाणिः—पित्तमित्यादिना पित्तजामाह—शरीरसंख्याशारीरे एवमुक्तम् यद् द्रव-सर-मन्द-स्निग्ध-मृदु-पिच्छिलरसरुधिरवसाकफपित्तमूत्रस्वेदादि तदाप्यं रसो रसनञ्चेत्यनेन, तथा तत्रैव यत् पित्तमित्यनेन द्व्यात्मकत्वं पित्तस्य यद्यप्युक्तं तथाप्याग्नेयबाहुल्यात् पित्तमाग्नेयमेवेति दर्शयन्नाह—पित्तं मतमाग्नेयमिति। द्व्यात्मकत्वेऽपि च पित्तस्याग्नेयांशप्राधान्यात्, अन्यत्रापि सौम्याग्नेयवायव्याधिकारभेदैः पैत्तिकविकाराः आग्नेयत्वेन गृहीता एव। सन्तप्तः स हीति स अब्धातुः सन्तप्तः। सन्तप्तः समिति पाठपक्षे पित्तमेव जनयेदिति योज्यम्। यदाब्धातुजनयति तदा पित्तसन्तप्त एव जनयतीति पित्तस्यैव कर्त्तृत्वम्॥ ७॥

---

* सन्तप्तः स हीति चक्रसम्मतः पाठः।

तृष्णा यामप्रभवा साप्याग्नेयो न पित्तजनितत्वात्।
लिङ्गं तस्याश्चारुचिराध्मानकफप्रसेकौ च ॥ ८ ॥
देहो रसजोऽम्बुभवो रसश्च तस्य क्षयाच्च तृष्येद्धि।
दीनस्वरः प्रताम्यन् संशुष्कहृदयगलतालुः ॥ ९ ॥

गङ्गाधरः—आमजतृष्णामाह—तृष्णेत्यादि। उष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम्। दुष्टमामाशयगतं रसमामं प्रचक्षते। इति। तस्मादामात् प्रभवा तु या तृष्णा साप्याग्नेयी योऽन्नरस आग्नेयान्नज एवापाचित आमः स्यात् तदामजा तृष्णा भवतीत्याग्नेयी न तु पित्तजनितत्वादाग्नेयी। तस्या लिङ्गम् अरुच्यादित्रयमिति। वातजपित्तजाभ्यामतिरिक्तामजा पृथक् पठिता। अन्यत्रामतस्त्रिदोषकोपात् त्रिदोषलिङ्गामसमुद्भवा तु हृच्छूलनिष्ठीवनसादकर्त्रीति पठ्यते ॥ ८ ॥

गङ्गाधरः—क्षयजतृष्णामाह—देह इत्यादि। मधुरादिषड्रसान्नगतषड्रसजो गर्भिण्या रसो नामाद्यधातुस्तद्भवोऽपत्यानां देह एवं रसश्च स्वकृतषड्रसान्नाहारजाम्बुभव इत्यतस्तस्य रसस्य क्षयाच्च नरस्तृष्यति। भवति खलु प्रताम्यन् सन् दीनस्वरश्च दीनश्च संशुष्कहृदयगलतालुश्च। भ्रान्तो दीनस्वरइत्यादिकमुपसर्गजाया लक्षणतया व्याचष्टे, तन्न; क्षयजलक्षणानुरूपातिरिक्तमिति। अन्यत्र चोक्तम्। रसक्षयाद् या क्षयसम्भवा सा तयाभिभूतश्च निशादिनेषु। पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः ॥ रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग् व्यवस्येदिति ॥ ९ ॥

चक्रपाणिः—तृष्णेत्यादिनाऽऽमजामाह। आमशब्देन च समानलक्षणतया कफजाऽपि गृह्यते। साप्याग्नेयीत्यनेन पूर्व्वपरिज्ञातं सर्व्वासां वातपित्तजन्यत्वं समुच्चयति। वातश्च तृष्णाकरणेनोक्तोऽपि अत्र प्रधानम्। अन्यत्राप्युक्तम्—'दर्शनं पक्तिरूष्मा च क्षुत् तृष्णा देहमार्द्दवम्। प्रभावप्रसादौ मेधा पित्तकर्म्मविकारज'मिति। आमपित्तजनितत्वादिति आमावरोधवृद्धपित्तजनितत्वादित्यर्थः ॥ ८ ॥

चक्रपाणिः—देहो रसज इत्यादिना आहाररसात् सर्व्वधातुत्वमुत्पद्यते। स च रसो देहपोषकोऽम्बुभव इति आप्यः, तस्य क्षयादिति रसक्षयात् अम्बुक्षयो भवति, तेन चाम्बुक्षयेण पुरुषः पानीयप्रार्थनारूपतृष्णायां युक्तो भवतीति दर्शयति। उक्तं हि सुश्रुते—'दोषधातुमलक्षीणो बलक्षीणोऽपि मानवः। स्वयोनिवर्द्धनं यत् तदन्नपानं प्रकाङ्क्षतीति। इहापि चोक्तं रससंक्षये तृष्यति ॥ ९ ॥

भवति खलु योपसर्गात् तृष्णा सा शोषिणी कष्टा।
ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम् ॥
सर्व्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम्।
घोरोपद्रवयुक्ता तृष्णा मरणाय विज्ञेया ॥
नाग्नें विना * हि तर्षः पवनाद्वा तौ हि शोषणे हेतू।
अब्धातोरतिवृद्धावपां क्षये तृष्यते नरो हि ॥

गङ्गाधरः—पारिशेष्यादुपसर्गात्मिकां तृष्णामाह—भवतीत्यादि। या तृष्णा भवत्युपसर्गा ज्वराद्युपसृष्टदेहानां नराणां सा तृष्णा शोषिणी मुखादिशोषकारिणी कष्टा कष्टसाध्या कष्टदा च। ज्वरमोहक्षयकासश्वासादीत्यत्रादिशब्देन क्षतमद्यपानात्ययादिजा संगृहीता न त्वतिरिक्ता। कष्टत्वप्रसङ्गादन्यासामपि कष्टत्वमाह—सर्व्वास्त्वित्यादि। अतिप्रसक्ताः सर्व्वा एव तृष्णाः कष्टा भवन्ति। रोगान्तरकृशानाञ्च सर्व्वाः तृष्णाः कष्टा वमिप्रसक्तानाञ्च सर्व्वाः तृष्णाः कष्टा भवन्ति। परे सर्व्वासामसाध्यतामाहुः, तन्न; सर्व्वा इति बहुवचनान्तस्य घोरेत्यादिप्रथमैकवचनान्तैरन्वयाभावात्। तस्मात् कष्टा इत्यनेन वचनविपरिणामेनान्वयः। सर्व्वास्त्विति तुशब्देन कष्टा इत्यस्यानुकर्षात्। असाध्यामाह। घोरेत्यादि। घोरा भयानिका या तृष्णा भवत्युपद्रवयुक्ता वातादुक्तलिङ्गा सती तदुत्तरकालजातरोगयुक्ता, सा तृष्णा मरणाय विज्ञेया। इति। नन्वाभ्योऽप्यतिरिक्तास्तृष्णाः दृश्यन्ते ताः कथं नोपदिश्यन्त इत्यत आह। नाग्नेरित्यादि। हि यस्मादग्नेस्तेजसो विना पवनाद्वा विना तर्षो न भवति। कस्मात्? तावित्यादि। हि यस्मादब्धातोरतिवृद्धौ शोषणे हेतू तावग्निपवनौ भवतः, तस्मान्नरोऽपां क्षये तृष्यते। तथाहि चाह।

चक्रपाणिः—भवतीत्यादिनोपसर्गजामाह। ज्वराद्युपद्रवरूपा भवति। कष्टेति कष्टसाध्या। एवं प्राक्सूत्रितवातपित्तामाम्बुक्षयोपसर्गात्मिका पञ्च तृष्णा व्याहृताः। अत्रैव सुश्रुतोक्ता कफजा सामजायामवरुद्धा, क्षतजा उपसर्गात्मिकायामवरुद्धा। अन्नजाया आमेनैवान्तर्भावनीया। इदानीं तृष्णाया असाध्याया लक्षणमाह—सर्व्वास्त्वित्यादि। घोरोपद्रवयुक्तेति पीड़ाकरोपद्रववती। सम्प्रति तृष्णान्तराणां उक्ततृष्णायामेवान्तर्भावं दर्शयन् उक्तवक्तव्यतृष्णानामपि वातपित्तक्षयजन्यत्वमाह—नाग्निमित्यादि। कस्मात् पुनः अग्निवातौ विना तर्षो न भवतीत्याह। तौ हि अतिवृद्धौ पित्तरूपौ अग्निवातौ अब्धातुशोषणे हेतू। तस्मान्नाग्निवातौ विना तर्षः

* नाग्निमिति चक्रसम्मतः पाठः।

गुर्व्वन्नपयःस्नेहैः सम्मूर्छद्भिर्विदाहकाले च।
यस्तृषेद्‌ वृतमार्गे तत्राप्यनिलानलौ हेतू॥ १०।
तीक्ष्णोष्णरूक्षभावान्मद्यं पित्तानिलौ प्रकोपयति।
शोषयतोऽपां धातुं तावेव हि मद्यशीलानाम्॥
तप्तास्विव सिकतासु हि तोयमाशु शुष्यति क्षिप्तम्।
तेषां सन्तप्तानां हिमजलपानाद्‌ भवति शर्म्म॥
शिशिरस्नातस्योष्णो(ष्मा) रुद्धः कोष्ठं प्रपद्य तर्षयति।
तस्माद्‌ भजेत सहसा नोष्णः स्नाने जलं शीतम्॥

गुर्व्वन्नेत्यादि। विदाहकाले पाककाले सम्मूर्च्छद्भिः परस्परं संयोगविभागाभ्यामेकीभावमापद्यमानैर्गुर्व्वन्नपयःस्नेहैर्वृतमार्गे पवनतेजसोर्गतिवर्त्मावरणे यः पुमांस्तृष्येत् तत्रापि पवनानिलौ हेतू भवतः। तस्मादन्नजा तृष्णा नातिरिक्ता॥ १०॥

<u>गङ्गाधरः</u>—या चापरा मद्यजा तृष्णा तामाह—तीक्ष्णेत्यादि। मद्यं तीक्ष्णादिगुणैः पित्तानिलौ प्रकोपयति, मद्यकुपितौ तावेव पित्तानिलौ मद्यशीलानामपां धातुं शोषयतः। तप्तास्विव यथा तप्तासु सिकतासु क्षिप्तं तोयमाशु शुष्यति। तेषां मद्यसन्तप्तानां नृणां हिमजलपानाच्छर्म्म भवति। तस्माद्‌ वातपित्तजतृष्णातिरिक्ता न मद्यजा तृष्णा। अपरा च या दृश्यते तामाह—शिशिरेत्यादि। शिशिरे स्नातस्य चोष्णो देहोष्मा रुद्धः सन् कोष्ठं जठरं प्रपद्य तर्षयति। तस्मादुष्णः सन्तप्तदेहः पुमान् स्नाने शीतं जलं सहसा न भजेत। अत्रापि देहोष्मा पित्तविशेष एव, तज्जातेयं तृष्णा नातिरिक्ता। इत्युक्तमित्यर्थः। एवमग्निवाताभ्यां कृतेऽपां क्षये स्वरूपादेव नरस्तृष्यति। एवं पित्तवातहताब्धातुक्षयजत्वमभिधाय अन्तर्भावनीयतृष्णामाह—गुर्व्वन्नेत्यादि। संमूर्च्छद्भिरिति एकतां गच्छद्भिः। अत्र वातो वृद्धः संमूर्च्छने अमुष्य तृष्णाकरः विदाहकाले च तृष्णा तत्र पित्तं तृष्णाकरम्॥ १०॥

<u>चक्रपाणिः</u>—मद्यजामपि अन्तर्भावयन्नाह—तीक्ष्णोष्णेत्यादि। सिकतासु हि तोयमिति प्रशमकथनम्। शर्म्मेति सुखम्। शीतजामन्तर्भावयन्नाह—शिशिरेत्यादि। शिशिरं शीतम्। उष्मा रुद्ध इति शीतस्पर्शबलेन बहिर्निर्गच्छन् रोमकूपैः उष्मावरुद्धः प्रतीपीकृतः। एतेन एतस्यापि पित्तजत्वमुक्तम्। न सहसेत्यनेन विश्रमार्थं, शीतजलसेवायां न तथाविधा तृष्णा

लिङ्गं सर्व्वास्वेतास्वनिलक्षयात् पित्तजं भवत्यथ तु।
पृथगागमाच्चिकित्सितमतः प्रवक्ष्यामि तृष्णानाम्॥ ११॥
अप्संक्षयाद्धि तृष्णा संशोष्य नरं मारयेदाशु।
तस्मादैन्द्रं तोयं समधु पिबेद्ध तद्गुणं वान्यत्॥
किञ्चित्तुवरानुरसं तनु लघु शीतं सुगन्धि सुरसञ्च।
अनभिष्यन्दि च यत् तत् क्षितिस्थितमथैन्द्रवज्ज्ञेयम्॥
शृतशीतं ससितोद्पलमथवा शरपूर्व्वपञ्चमूलेन॥ १२॥

आसां लिङ्गमाह—लिङ्गमित्यादि। एतासु गुर्व्वन्नजादिषु सर्व्वासु तृष्णासु यदाऽनिलक्षयो भवति, तदा पित्तजं लिङ्गं भवतीति तृष्णानिदानमुक्तम्। अथ तु निदानोपदेशादनन्तरं पृथगागमात् पृथग्वातादिजत्वेन तृष्णानामुपदेशात् तृष्णानां चिकित्सितमतः पृथक् प्रवक्ष्यामि॥ ११॥

__गङ्गाधरः__—अप्संक्षयादित्यादि। तृष्णा हि यस्मादब्धातुसंक्षयात् संशोष्य नरमाशु मारयति, तस्मादैन्द्रं वृष्टिसम्भवं जलं समधु पिबेत् तद्गुणमैन्द्रजलगुणवदन्यद् वा जलं समधु पिबेत्। दिवार्ककिरणैर्जुष्टं जुष्टमिन्दुकरैर्निशि। वायुनास्फालितं शश्वत् तत्तुल्यं गगनाम्बुनेति। तद्गुणमन्यज्जलमाह—किञ्चिदित्यादि। किञ्चित्कषायानुरसं तनु चाघनं लघु च शीतञ्च सुगन्धि च सुरसञ्चानभिष्यन्दि च यद्भूमिस्थितं जलं तदैन्द्रजलवज्ज्ञेयमिति। शृतशीतमित्यादि। अर्द्धावशिष्टं जलं शृतं ससितोपलं शर्करामिश्रं पिबेत्। अथवा शरादिपञ्चमूलेन शृतं ससितोपलं पिबेत्॥ १२॥

भवतीति दर्शयति। सम्प्रति भिन्नसंमूर्च्छनादीनां यथोक्तक्रमेण अनिलपित्तजावरोधमभिधाय सर्व्वासामेवानिलक्षयपित्तजत्त्वम् उपदर्शयन्नाह—लिङ्गं सर्व्वास्वित्यादि। पृथगागमादिति पृथग्हेतुत्वात्। आगच्छत्यस्मादिति आगमो हेतुः। वातादिहेतुभेदाच्चिकित्सितभेदं वक्ष्यामीत्यर्थः। किंवा पृथक् हि चिकित्सितं वक्ष्यामि। आगमादिति आयुर्व्वेदागमप्रामाण्यात्। आगमे तृष्णानां भेदेन चिकित्साभिधानात् अहमपि पृथक् चिकित्सां वक्ष्यामीत्यर्थः॥ ११॥

__चक्रपाणिः__—अपां क्षयादित्यादिना चिकित्सामाह। ऐन्द्रमित्यान्तरिक्षम्। तद्गुणं वान्यदिति यदुक्तं तत्राह—किञ्चिदित्यादि। तुवरोऽनुरसतया रस्यते आस्वाद्यते यस्मिन्निति तुवरानुरसम्। आन्तरिक्षं जलं अव्यक्तसर्व्वरसयुक्तम्, अव्यक्तीभावस्तु गन्धरसानां प्रकृतो भवति। ऐन्द्रवदित्यनेन अन्तरिक्षानुकारि। शरेक्षुदर्भकुशकाशानां मूलमेव च इत्यत्रोक्तेन शरपञ्चमूलेन॥ १२॥

लाजानां सक्तूनां समधुसितं मन्थमैन्द्रेण।
वाट्यश्चामयवानां शीतं मधुशर्करायुतं दद्यात्।
पेयां वा शालीनां दद्याद्वा कोरदूषाणाम्॥ १३॥
पयसा शृतेन भोजनमथवा मधुशर्करायुतं योज्यम्।
पारावतादिकरसैर्घृतभृष्टैर्वाप्यलवणाम्लैः॥
तृणपञ्चमूलमुञ्जातकैः पियालजैश्च जाङ्गलाः सुकृताः।
शस्ता रसाः पयो वा तः सिद्धं शर्करामधुमत्॥
शतधौतघृतेनाक्तः पयः पिबेच्छीततोयमवगाह्य।
मुद्गमसूरचणकजा रसाश्च घृतभर्ज्जिता देयाः॥ १४॥
मधुरैः सजीवनीयैः शीतैश्च सतिक्तकैः शृतं क्षीरम्।
पानाभ्यञ्जनयोगेष्विष्टं मधुशर्करायुतम्॥

गङ्गाधरः—लाजानां सक्तूनां समधुसितं समधुशर्करं मन्थमैन्द्रजलेन कृतं दद्यात्। आमयवानां वाट्यं मण्डं शीतं मधुशर्करायुतं दद्यात्। पेयां वेत्यादि। शालीनां पेयां वा कोरदूषाणां वा पेयां दद्यात्॥ १३॥

गङ्गाधरः—अथवा पयसा शृतेन पक्वेन दुग्धेन मधुशर्करायुतं भोजनमन्नं योज्यम्। भोजने व्यञ्जनार्थमाह—पारावतेत्यादि। घृतभृष्टैः पारावतादि-मांसरसैर्वाप्यलवणाम्लैर्लवणाम्लवर्ज्जितैर्भोजनं दद्यात्। रसांश्चाह तृणेत्यादि। मुञ्जातक औत्तरापथिकः कन्दः। तृणपञ्चमूलं कुशादिपञ्चमूलं मुञ्जातकश्चेत्येतैः शृततोयैः पियालफलरसैश्च सिद्धा जाङ्गलाः पारावतादीनां मांसरसाः शस्ताः। अथवा तैस्तृणपञ्चमूलमुञ्जातैः पियालैश्च सिद्धं पयः शर्करामधुमत् शस्तम्। शतधौतेत्यादि। तृष्णावान् नरः शतधौतघृतेनाक्तः सन् शीततोयम् अवगाह्य पयः पिबेत्। मुद्गादिरसाश्च घृतभर्ज्जिता देयास्तृष्णावते॥ १४॥

गङ्गाधरः—मधुरैरित्यादि। सजीवनीयैर्मधुरैर्द्रव्यैः शृतं क्षीरं तथा शीतैः सतिक्तकैर्द्रव्यैः शृतं क्षीरं मधुशर्करायुतं तृष्णावतां पानाभ्यञ्जनयोगेषु

चक्रपाणिः—आमयवानां वाट्यं ईषद्भृष्टयवमण्डः॥ १३॥

चक्रपाणिः—तैरिति तृणपञ्चमूल्यादिभिः। मधुरैरिति मधुररसैः। शीतैरिति शीतवीर्य्यैः॥ १४॥

तज्जं वा घृतमिष्टं पानाभ्यङ्गेषु नस्यमपि च स्यात्।
नारीपयः सशर्करमुष्ट्रा अपि नस्यमिक्षुरसः॥
क्षीरेक्षुरसगुड़ोदकसितोपलाक्षौद्रसीधुमाध्वीकैः *।
वृक्षाम्लैर्मातुलुङ्गैर्गण्डूषास्तालुशोषघ्नाः॥ १५॥
जम्ब्वाम्रातकबदरीवेतसपञ्चपल्लवैश्चाम्लाः।
हृन्मुखशिरःप्रदेहाः संश्रितमूर्च्छाभ्रमतृष्णाघ्नाः॥
दाड़िमदधित्थलोध्रैः सविदारीवीजपूरकैः शिरसः।
लेपो गौरामलकैर्घृतारनालयुतैश्च हितः॥
शैवलपङ्काम्बुरुहैः साम्लैः सघृतैश्च शक्तुभिर्लेपाः॥ १६॥
मस्त्वारनालार्द्रवसनकमलमणिहारसंस्पर्शाः।
शिशिराम्बुचन्दनार्द्रस्तनतटपाणितलगात्रसंस्पर्शाः॥

इष्टमिति। तज्जं वेत्यादि। तथाविधशृतक्षीरजं घृतं तृष्णावतां पानाभ्यङ्गेषु स्यान्नस्यमपि च स्यात्। नारीपय इत्यादि। सशर्करं नारीपयस्तृष्णावतां नस्यं स्यात्। उष्ट्रा अपि पयः सशर्करं नस्यं स्यात्। इक्षुरसश्च नस्यमिष्टम्। क्षीरेत्यादि। क्षीरादीनामन्यतमेन गण्डूषास्तालुशोषघ्नाः॥ १५॥

गङ्गाधरः—जम्ब्वाम्रेत्यादि। जम्बूफलादिभिरम्ला हृदादिषु प्रदेहाः संश्रितान् मूर्च्छादीन घ्नन्ति। दाड़िमेत्यादि। दाड़िमादिभिः पञ्चभिः शिरसो लेपः संश्रितमूर्च्छादिषु हितः। गौरामलकैरारनालपिष्टैर्घृतयुतैः शिरसो लेपश्च तेषु हितः। गौरा हरिद्रा। शैवलेत्यादि। शैवलादिभिः सक्लन्तैः षड़्भिः षट् लेपास्तृष्णाघ्ना इति परेणान्वयः॥ १६॥

गङ्गाधरः—मस्त्वारनालान्यतरेणार्द्रवसनस्पर्श-कमल-मणिहारसंस्पर्शाश्च तृष्णाघ्नाः। शिशिराम्बुना चन्दनेन वार्द्राणां स्तनतटपाणितलगात्राणां

चक्रपाणिः—तज्जमिति मधुरादिशृतक्षीरजम्। मार्द्वीकं मृद्वीकारसः। गण्डूषो मुखपूरको द्रवः॥ १५॥

चक्रपाणिः—पञ्चाम्लं 'कोलवृक्षाम्लचूक्रीकासंयुतश्चाम्लवेतसैः। चतुरम्लमिति प्रोक्तं पञ्चाम्लन्तु सदाडिम'मिति वचनाज्ज्ञेयम्। दधित्थः कपित्थः। गौरामलकैरिति आर्द्रं तया गौरदण्डैरामलकैः॥१६॥

* मार्द्वीकैरिति चक्रसम्मतः पाठः।

मौक्तिकक्षौमार्द्र निवसनानां वराङ्गनानां प्रियाणाञ्च।
हिमवद्दरीवनसरित्सरोऽम्बुजवनोपवनपादपशिशिराणाम्। *
रम्योदकयुक्तानां स्मरणं कथाश्च तृष्णाघ्नाः॥ १७॥
वातघ्नमन्नपानं मृदु लघु शीतञ्च वाततृष्णायाः।
क्षयकासनुद् घृतं क्षीरमूर्द्ध्वं वाततृष्णाघ्नम्॥ १८॥
स्याज्जीवनीयसिद्धं क्षीरं घृतं वातपित्तजे तर्षे।
पैत्ते द्राक्षाचन्दनखर्ज्जूरोशीरमधुयुतं तोयम्॥ †
लोहितशालिप्रस्थः सलोध्रमधुकाञ्जनोत्पलः क्षुण्णः।
पक्त्वामलोष्ट्रमधुजलसमायुतो मृन्मये पेयः॥

संस्पर्शाः तृष्णाघ्नाः। मौक्तिकादीनाञ्च संस्पर्शाः तृष्णाघ्नाः। आर्द्र-निवसनं निवासस्थानम्। हिमवतां शीतलानां दरीप्रभृतीनां पादपान्तानां शिशिराणां नीहारवारीणाम् एषां रम्योदकयुक्तानाञ्च संस्पर्शाः स्मरणं कथाश्च तृष्णाघ्नाः॥ १७॥

गङ्गाधरः—सामान्यतस्तृष्णाचिकित्सितमुक्त्वा विशेषत आह—वातघ्नेत्यादि। वाततृष्णायां वातघ्नान्नपानं मृदु लघु शीतं न तु कठिनगुरूष्णम्। क्षयकासनुद् यद् यद् घृतमुक्तं तत्तत् पीत्वोर्द्ध्वं क्षीरं पीतं वाततृष्णाघ्नम्॥ १८॥

गङ्गाधरः—स्यादित्यादि। वातपित्तजे वातजे पित्तजे तदुभयजे च तर्षे। पैत्ते तर्षे द्राक्षादिशृतं तोयम्। लोहितेत्यादि। रक्तशालीनां प्रस्थः शरावद्वयम्। किञ्चिल्लोध्रमधुकनीलोत्पलसहितः क्षुण्णः कुट्टितः मृन्मये पात्रे जलेन पक्त्वा अर्द्धशृतजलभूतः आमलोष्ट्रं मधु च जलञ्च तत्र प्रक्षिप्य स्थापितः स्वच्छीभूतः

चक्रपाणिः—इन्दुपादाश्चन्द्ररश्मयः॥ १७॥

चक्रपाणिः—वातघ्नेत्यादि। तृष्णानां वैशेषिकचिकित्सितमाह—क्षयकासहरैः शृतं क्षयकासनुद् घृतम्। ऊर्द्ध्वं वातः श्वासः॥ १८॥

चक्रपाणिः—वातपित्तजे तर्षे इत्यत्र संसर्गजा तृष्णा असूत्रितापि असूत्रितद्वन्द्वजगुल्मन्याये-नोच्यते। पैत्ते इत्यत्र तर्षे इति शेषः। लोहितशालिप्रस्थ इत्यादौ लोध्रादीनां मिलितानां चतुःपलं प्रक्षेप्यन्यायात् पादिकं पक्वामलोष्ट्रप्रसादनञ्च दत्त्वा शालितण्डुलप्रस्थं क्षुण्णं स्थाप्यते,

* वनेन्दुपादशिशिराणामिति चक्रः।

† इतःपरं—लोहितकशालितण्डुलखर्ज्जूरपरुषकोत्पलद्राक्षाः। मधु पक्वलोष्ट्रमेव च जले शृतं शीतलं पेयमित्यधिकः पाठः क्वचित्।

वटमातुलुङ्गवेतसपल्लवकुशकाशमूलयष्ट्याह्वैः।
सिद्धेऽम्भस्यग्निनिभां कृष्णां मृदं कृष्णसिकतां वा॥
तप्तानि नवकपालान्यथवा निर्व्वाप्य पाययेताच्छम्।
* अल्पा पक्वशर्करामृतवल्लीजलं वा तृषं हन्ति॥
क्षीरवतां मधुराणां शीतानां शर्करामधुमिश्राः।
शीतकषाया मृद्भृष्टसंयुक्ताः क्षयतृष्णाघ्नाः॥
व्योषवचाभल्लातकतिक्तकषायास्तथामतृष्णाघ्नाः।
यच्चोक्तं कफजायां छर्द्यां तथैव कार्य्यं स्यात्॥ १९॥
स्तम्भारुच्यविपाकालस्यच्छर्दिषु कफानुगां तृष्णाम्।
ज्ञात्वा दधिमधुतर्पणलवणोष्णजलैर्वमनमिष्टम्॥

शीतः पेय इत्युपदेशः। वटेत्यादि। वटादीनां पल्लवं कुशकाशयोर्मूलं यष्ट्याह्वञ्च जले पक्त्वार्द्धशिष्टमवतार्य्य पूते सिद्धेऽम्भसि तप्तामग्निनिभां कृष्णवर्णमृत्तिकाम् अथवा कृष्णवर्णसिकतामग्निनिभामथवा नवघटादीनां कपालानि तप्तानि प्रक्षिप्य निर्व्वाप्य शीतीकृत्याच्छं निर्म्मलं जलं पाययेत। अथवा अल्पा क्षुद्रा शर्करा कङ्कराख्या पक्वाऽग्निना तप्ता निर्व्वापिता अमृतवल्ली गुड़ची तस्या जलं तया शृतं जलं तृषं हन्ति। क्षीरवतामित्यादि। क्षीरवतां वटादीनां शीतकषाया मृद्भृष्टसंयुक्ताः भृष्टमृत्संयुक्ताः निर्व्वापिताः शर्करामधुमिश्राः क्षयतृष्णाघ्नाः। एवं मधुराणां काकोल्यादीनां शीतकषाया भृष्टमृत्संयुक्ता निर्व्वापिताः शर्करामधुमिश्राः। तथा शीतानामामलकादीनां शीतकषाया भृष्टमृन्निर्वापिताः शर्करामधुमिश्राः। व्योषेत्यादि। व्योषादीनां कषाया आमतृष्णाघ्नाः। यच्च भेषजं कफच्छर्द्द्यामुक्तं तदपि तथैव तेन प्रकारेणैवामतृष्णायां कार्य्यं स्यात्॥ १९॥

<u>गङ्गाधरः</u>—स्तम्भेत्यादि। देहस्तम्भाद्युपसर्गेषु कफानुगां तृष्णां ज्ञात्वा

तस्य पानयोग्या मात्रा मधुप्रक्षेपात् मृन्मये पात्रे पीयत इति वृद्धैरुपादर्शितम्। अल्पपक्वशर्करमिति पाकनिमित्तमधुरसहितम्। अमृतवल्ली गुड़ूची। मृद्भृष्टसंयुता इति भृष्टमृद्युता इत्यर्थः॥ १९॥

---

* अल्पपक्वशर्करमिति चक्रः।

दाड़िममदनफलं वाप्यन्यतमकषायमथ लेहम्।
पेयमथवा प्रदद्याद् रजनीमधुशर्करायुतम् ॥ २० ॥
क्षयकासेन तुल्या क्षयतृष्णा सा गरीयसी नृणाम्।
क्षीणक्षतशोषहितैस्तस्मात् तां भेषजैः शमयेत् ॥ २१ ॥
पानतृड़ार्त्तः पानं त्वर्द्धोदकमम्ललवणगन्धाढ्यम्।
शिशिरस्नातः पानं मद्याम्बु गुड़ाम्बु वा तृषितः ॥
भक्तोपरोधतृषितः स्नेहतृष्णार्त्तोऽथवा तनुं यवागूम्।
प्रपिबेद् गुरुणा तृषितो भक्तेन तदुद्धरेद् भक्तम् ॥
मद्याम्बु वाम्बु चोष्णं बलवान् तृषितः समुल्लिखेत् पीत्वा।
मागधिकाविशदमुखः सशर्करं वा पिबेन्मन्थम् ॥ २२ ॥

दध्यादिभिर्वमनमिष्टम्। दाड़िमेत्यादि। दाड़िममदनफलं वा वमनम्। अन्यतमकषायं वमनौषधानामन्यतमकषायं रजनीमधुशर्करायुतं वा वमनं प्रदद्यात्। अथवा वमनकल्पोक्तं लेहं रजन्यादियुक्तं वमनं प्रदद्यात्। अथवा वमनोक्तं पेयं रजन्यादियुक्तं वमनं प्रदद्यात्। इति स्तम्भादिच्छर्द्यन्तोपसर्गात्मकतृष्णाचिकित्सितमुक्तम् ॥ २० ॥

गङ्गाधरः—अथ क्षयकासोपसर्गतृष्णाचिकित्सामाह—क्षयेत्यादि। क्षयकासेन या तृष्णा सा क्षयतृष्णा क्षयकासेन तुल्या, सा नृणां गरीयसी। तस्मात् क्षीणानां क्षतानां शोषाणाञ्च हितैर्भेषजैस्तां शमयेत् ॥ २१ ॥

गङ्गाधरः—मद्यपानोपसर्गतृष्णाचिकित्सामाह—पानेत्यादि। पानं मद्यपानं तस्माज्जाततृष्णार्त्तः अम्ललवणगन्धाढ्यमर्द्धोदकं पानं मद्यं पिबेदित्यध्याहार्य्यम्। पानजतृषितः शिशिराम्बुना स्नातः मद्याम्बु मद्यमिश्रमम्बु गुड़ाम्बुमिश्रं वा पानं पिबेत्। अन्नोपसर्गतृष्णाचिकित्सामाह—भक्तेत्यादि। क्षुधायामभोजनजतृषितः स्नेहपानतृषितो वा तनुमघनां यवागूं मण्डं प्रपिबेत्। गुरुणा भक्तेन तृषितः तद्भुक्तं भक्तमुल्लिखेद् वमेत्। तदुद्धरणार्थम्

चक्रपाणिः—अन्यतमकषायमिति आमलकादिकषायम् ॥ २० । २१ ॥

चक्रपाणिः—पानतृषार्त्त इति अतिशयपानजतृट्पीड़ितः। भक्तोपरोधो भक्तच्छेदः। मागधिका पिप्पली ॥ २२ ॥

बलवांस्तु तालुशोषो पिबेद् घृतं वृष्यमनु मद्यम्।
सर्पिर्जुष्टं * क्षीरं मांसरसांश्चाबलः स्निग्धान्॥
अतिरूक्षदुर्ब्बलानां तृष्णां शमयेन्नृणामथाशु पयः।
छागो वा घृतभृष्टः शीतो मधुरो रसो हृद्यः॥
स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात् तां गुड़ाम्बुना शमयेत्।
तर्षं मूर्च्छाभिहतस्य रक्तपित्तापहैर्हन्यात्॥ २३॥
छर्द्यम्लदाहमूर्च्छाभ्रमक्लममदात्ययास्रविषपित्ते।
शस्तं स्वभावशीतं शृतशीतं सन्निपातेऽम्भः॥

आह—मद्याम्बु इत्यादि। बलवान् गुरुभक्तजतृषितः पुमान् मद्याम्बु पीत्वा अथवोष्णाम्बु पीत्वा समुल्लिखेत्। वान्तः सन् मागविकां चर्व्वयित्वा विशदमुखः सन् सशर्करं मन्थं वा पिबेत्॥ २२॥

गङ्गाधरः—तालुशोषचिकित्सामाह—बलवांस्त्वित्यादि। तृष्णायां तालुशोषवान् बलवांस्तु वृष्यं वाजीकरणोक्तं घृतं पिबेत् तदनु मद्यं पिबेत्। अवलस्तालुशोषी सर्पिर्जुष्टमनुद्धृतसर्पिः क्षीरं सर्पिःप्रक्षिप्तं वा क्षीरं पिबेत्। स्निग्धान् मांसरसांश्च पिबेत्। अतिरूक्षेत्यादि। अथातिरूक्षा दुर्ब्बलाश्च ये तेषां या तृष्णा तामाशु शमयेत् पयः। छागो वा मधुरो हृद्यः शीतो मांसरसो घृतभृष्टः शमयेत्। स्निग्ध इत्यादि। वैद्य इति शेषः। मूर्च्छाभिहतस्य या तृष्णा तां रक्तपित्तापहैर्भेषजैर्हन्यात्॥ २३॥

गङ्गाधरः—छर्दीत्यादि। छर्द्यादिषूपसर्गरूपा या तृष्णा तस्यां स्वभावशीतमम्भः शस्तम्, सन्निपाते त्रिदोषिकव्याधौ त्रिदोषहरद्रव्येण शृतशीतमम्भः

चक्रपाणिः—तालुशोषे यद्यपि घृतं निषिद्धं यदुक्तं 'तृष्णामूर्च्छापरीताश्च गर्भिण्यः तालुशोषिणः न पिबेयुर्घृतम्' इति, तथापि बलवतो वृष्यघृतपानं बोध्यम्। किंवा वातोल्बणावस्थायामेतद् घृतपानम्। गुड़ाम्बु स्निग्धं स्निग्धगुड़सहितत्वान्नहितम्। उक्तं हि—'यदाहारगुणैः पानं विपरीतन्तु दृश्यते'। (?) तदा दृश्यत इति। तदा मधुरतया तृष्णाहरत्वात् तु प्रभावाच्चोपयुज्यते। शीतमुष्णञ्च जलं कुत्र देयं वर्ज्यं वा कुत्रेत्याह। तर्षं मुर्च्छेत्यादिना औपसर्गिकतृष्णाचिकित्सोच्यते। विषपित्ते इति विषे पित्ते च। सन्निपाते इति सन्निपाते

* सर्पिर्भृष्टमिति वा पाठः।

हिक्काश्वासनवज्वरपीनसघृतपीतपार्श्वगलरोगे।
कफवातकृते स्त्याने सद्यःशुद्धे च हितमुष्णम्॥
पाण्डूदरपीनसमेहगुल्ममन्दानलातिसारेषु।
प्लीह्नि च तोयं न हितं काममशक्ये पिबेदल्पम्॥ २४॥
पूर्व्वामयातुरः सन् दीनस्तृष्णार्द्दितो जलं काङ्क्षन्।
न लभेत चेन्मरणमाश्वेव चाप्नुयाद्दीर्घरोगं वा॥
तस्माद्धान्याम्बु पिबेत्तृष्यन् रोगी सशर्करात्क्षौद्रम्।
यद्वा तस्यान्यत् स्यात् सात्म्यं रोगस्य तच्चेष्टम्॥
तस्यां विनिवृत्तायां तज्जोऽन्य उपद्रवः सुखं जेतुम्।
तस्मात् पूर्व्वं तृष्णां जयेद्‌ बहुभ्योऽपि रोगेभ्यः॥ २५॥

शस्तमिति। हिक्केत्यादि। हिक्कादिरोगे उपसर्गरूपा या तृष्णा कफवातकृते स्त्याने कफे शुद्धे च वमनविरेचनाभ्यां सद्यस्तर्षे उष्णमम्भो हितमिति। पाण्डूदरेत्यादि। पाण्ड्वादिषु या तृष्णा प्लीह्नि च या तृष्णा तत्र तोयं न हितम्। अशक्ये तृष्णासहने काममिष्टतरस्वल्पं तोयं पिबेत्॥ २४॥

गङ्गाधरः—पूर्व्वेत्यादि। पूर्व्वोत्पन्नामयेनातुरः सन् दीनादजलं काङ्क्षन् चेन्न लभेत, तदा शीघ्रमेव मरणं प्राप्नुयादथवा दीर्घरोगं प्राप्नुयात्। तस्मादित्यादि। तस्मान्मरणदीर्घरोगान्यतरप्राप्तिहेतोस्तृष्यन् रोगी धान्याम्बु धन्याकजलं शर्कराक्षौद्रयुक्तं पिबेत्। तस्य रोगस्य यद्वान्यद्द्रव्यं पानं सात्म्यं रोगिणः स्यात्तच्च पातुमिष्टं भवेत्। तस्यामित्यादि। यस्माद् यस्य रोगस्योपद्रवस्तृष्णा तस्यामुपद्रवात्मिकायां तृष्णायां विनिवृत्तायां तद्रोगजोऽन्य उपद्रवो जेतुं सुखं यथा स्यात्तथा स्यात्। तस्मादन्योपद्रवस्य सुखजेयत्वाद्बहुभ्योऽन्येभ्योऽपि रोगेभ्यः पूर्व्वं तृष्णां जयेदिति॥ २५॥

ज्वरे रोगे च। उद्भूततृष्णायां हितमिति पाण्ड्वादिरोगे तृष्णायामपि तोयं न हितम्। असह्ये तर्षे इति शेषः॥ २३। २४॥

चक्रपाणिः—असह्यतृष्णामयेषु जलस्याप्रदाने दोषमाह—पूर्व्वेत्यादि। पूर्व्वामयातुर इति पूर्व्वोत्पन्नगदपीड़ितः। तज्जोऽन्योपद्रव इति तृष्णाप्रशमनार्थं पीयमानपानीयजः। सुखं जेतुमिति महात्ययकरीं तृष्णामपेक्ष्य जेतुं सुखोपायो भवतीत्यर्थः॥ २५॥

भवति चात्र।

हेतू यथाग्निपवनौ कुरुतः सोपद्रवं पञ्चानाम्।

तृष्णानां पृथगाकृतिरसाध्यता साधनञ्चोक्तम्॥ २६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृतेऽप्राप्ते दृढ़बलप्रतिसंस्कृते

चिकित्सितस्थाने तृष्णारोगचिकित्सितं नाम

द्वाविंशोऽध्यायः॥ २२॥

गङ्गाधरः—अध्यायार्थमाह—भवतीत्यादि। हेतू इत्यादि॥ २६॥

अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते। अप्राप्ते तु दृढ़बल-प्रतिसंस्कृत एव च।

तृष्णाचिकित्सिते द्वाविंशाध्याये भिषजा पुनः। गङ्गाधरेण च कृते

जल्पकल्पतरौ वरे। चिकित्सितस्थानजल्पे षष्ठस्कन्धे वृहत्तमे।

तृष्णाचिकित्साजल्पाख्या शाखा द्वाविंशिका मता।

तृष्णाचिकित्सा व्याख्या समाप्ता॥ २६॥

हेतुरित्यध्यायसंग्रहः। अग्निपवनौ इति यथाग्निपवनौ कुरुतः सोपद्रवां तृष्णामिति शेषः। उपद्रवाश्च मुखशोषादयः पूर्व्वमुक्ताः॥ २६॥

इति महामहोपाध्यायचरकचतुराननश्रीमच्चक्रपाणिदत्तविरचितायामायुर्व्वेददीपिकायां

चरकतात्पर्य्यटीकायां चिकित्सितस्थानव्याख्यायां तृष्णाचिकित्सितं

नाम द्वाविंशोऽध्यायः॥ २२॥

त्रयोविंशोऽध्यायः ।

अथातो विषचिकित्सितं व्याख्यास्यामः,

इतिह स्माह भगवानात्रेयः ॥ १ ॥

प्रागुत्पत्तिं गुणान् योनिं वेगान् लिङ्गान्युपक्रमान् ।
विषस्य ब्रुवतः सम्यगग्निवेश निबोध मे ॥ २ ॥
मथ्यमाने जलनिधावमृतार्थं सुरासुरैः ।
जज्ञे प्रागमृतोत्पत्तेः पुरुषो घोरदर्शनः ॥
दीप्ततेजाश्चतुर्दंष्ट्रो हरिकेशो-*-ऽनलेक्षणः ।
जगद्विषण्णं तद्दृष्ट्वा विषं तत्तु विषादनात् ॥
जङ्गमस्थावरायान्तु योनौ ब्रह्मा न्ययोजयत् ॥ ३ ॥

Indira Gandhi National
Centre for the Arts

गङ्गाधरः—उद्दिष्टक्रमाद् विषचिकित्सितमाह—अथेत्यादि । सर्व्वं पूर्व्ववद्व्याख्येयम् ॥ १ ॥

गङ्गाधरः—प्रागुत्पत्तिमित्यादि । उपक्रमानित्यस्य विशेषणं सिद्धानिति ॥२

गङ्गाधरः—मथ्यमान इत्यादि । अमृतोत्पत्तेः पूर्व्वं घोरदर्शनादिरूपः पुरुषो नदादिवद् द्रवविशेषनिस्राविशरीरो जज्ञे । तस्य शरीरात् स्रुतं द्रवं विषं शम्भुः पपौ । शेषं किञ्चित् द्रवस्राविशरीरं तं विषपुरुषं ब्रह्मा स्थावरयोनौ जङ्गमयोनौ न्ययोजयत् नियुक्तमकरोत् । विषादनादिति विषादकारणम् । द्वे योनी ॥ ३ ॥

चक्रपाणिः—शीतोपशमप्राधान्यसामान्यात् तृष्णाचिकित्सितमनु विषचिकित्सितमुच्यते ॥१॥

चक्रपाणिः—प्रागिति । प्रागुत्पत्तिः आद्योत्पत्तिः । योनिरित्यधिष्ठानम् । लिङ्गानीति देहसम्बन्धिविषस्य लिङ्गानि । अत्र नापृष्टा गुरवो वदन्तीति न्यायात् शिष्यप्रश्नो ज्ञातव्यः । विषञ्च यद्यपि रोगाधिकारे न सूचितं साक्षात् तथापि विषगराभिधानात् तत्तत्कारणतया सूत्रितमेव रोगाधिकारे ज्ञेयम् । तेन नोत्सूत्रितमिह विषाभिधानमिति ॥ २ ॥

चक्रपाणिः—मथ्यमाने इत्यादिना प्रागुत्पत्त्यभिधानं विषस्य महाप्रभावदर्शनार्थम् । हरित्केश इति कालकेशः । स रुषः विषमुच्यते विषादनाद्धतोः । एवञ्च विषशब्दनिरुक्तिर्भवति ॥ ३ ॥

---

* हरित्केश इति पाठान्तरम् ।

तदम्बुसम्भवं तस्माद्‌ द्विविधं पावकोपमम्।
अष्टवेगं दशगुणं चतुर्विंशत्युपक्रमम्।
तद्वर्षास्वम्बुयोनित्वात् संक्लेदं गुड़वद्‌ गतम्॥
सर्पत्यम्बुधरापाये तदगस्त्यो निहन्ति च।
प्रयाति मन्दवीर्य्यत्वं विषं तस्माद्‌ घनात्यये॥ ४॥

गङ्गाधरः—इति प्रागुत्पत्तियोनिवचनमुक्त्वा भेदमाह तदम्बु इत्यादि। यस्मात्तत् क्षीरोदाम्बुसम्भवं तस्माद्द्विविधमेव स्थावरजङ्गमयोनिकं पावकोपमं भवति। प्रागुत्पत्तावग्निर्जलं सृज्यमानमनुप्राविशदिति तस्माज्जलादिदं जातमग्निवदभिव्यक्तमिति पावकोपमम्। अष्टेत्यादि। तदष्टवेगं दशगुणं चतुर्विंशत्युपक्रमं भवति। सुश्रुतेऽपि प्रागुत्पत्तिरुक्ता। तद्‌यथा। "प्रजामिमामात्मयोने ब्र ह्मणः सृजतः किल। अकरोदसुरोविघ्नं कैटभो नाम दर्पितः। ततः क्रुद्धस्य वै वक्त्राद्‌ ब्रह्मणस्तेजसोनिधेः। क्रोधो विग्रहवान् भूत्वा निष्पपाताथ दारुणः। स तं ददाह गर्ज्जन्तमन्तकाभं महाबलम्। ततोऽसुरं घातयित्वा तत् तेजोऽवर्द्धताद्भुतम्। ततो विषादो देवानामभवत् तं निरीक्ष्य वै। विषादजननात् तच्च विषमित्यभिधीयते। ततः सृष्ट्वा प्रजाः शेषं तदा तं क्रोधमीश्वरः। न्यस्तवान् स भूतेषु स्थावरेषु चरेषु च"। इति। इत्येवं सुश्रुतोक्तविषप्रागुत्पत्तिविरोधः परिहार्य्य एवं विद्वद्भिः। य एष ब्रह्मणः कोपपुरुषो विषाख्यः सर्गकाले जातो ब्रह्मणैव स्थावरजङ्गमेषु भूतेषु विन्यस्तः स एव पुनः कृतयुगे देवासुरैः क्षीरोदे मथ्यमाने मन्थनदण्डीभूतमन्दरपर्व्वतस्य नानौषधिवृक्षप्राणजुष्टस्य मन्थनरज्जूभूतस्य वासुकेर्मन्थनवेगाकर्षणक्रान्तस्य मुखात् निःसृतं विषं नानौषधिप्राणस्थविषञ्चैकीभूतं पुनर्यो विषाख्यः पुरुषो जातः स उक्त इह तन्त्रे त्वाचार्य्येणेति न विरोधः। तदित्यादि। तद्विषमम्बुयोनित्वात् स्वभावेण वर्षासु प्रावृषि ऋतौ गुड़वत संक्लेदं गतं सर्पति चलति।

चक्रपाणिः—तदम्बुसम्भवं तस्मात द्विविधमिति—तस्मात सम्बन्धतः उत्पन्नत्वादम्बुसम्भव तथा तस्माद् ब्रह्मणो योनिद्वययोनियुक्तत्वात द्विविधमित्यर्थः। अम्बुसम्भवत्वेन चास्य वर्षप्रकोपित्वं वक्ष्यमाणं युक्तं योनिभूतेन अस्य प्रभावप्रशमने क्रियेत इति ज्ञेयम। उक्तं हि भगवता व्यासेन 'अद्भ्योऽग्नेरुक्षतोत्पत्तिरश्मनो लोहमुत्थितम्। तस्मात सर्व्वत्रगं तेज' इति। अष्टवेगमिति मनुष्यापेक्षयाष्टवेगम। दशगुणा इत्यग्रे वक्ष्यमाणाः। उपक्रमं चिकितसानुष्ठानभेदः। सर्व्वविषविशेषप्रकोपे हेतुमाह—तद्वर्षास्विति। गुड़ो यथा अम्बुयोनित्वात् वर्षासूपक्लिन्नो भवति तथा विषमपि

सर्पाः कीटोन्दुरा लूता वृश्चिका गृहगोधिकाः।
जलौका मत्स्यमण्डूकाः शलभाः सर्पकण्टकाः॥
श्वसिंहव्याघ्रगोमायुतरक्षुनकुलादयः।
दंष्ट्रिणो ये विषं तेषां दंष्ट्रोत्थं जङ्गमं मतम्॥ ५॥

अम्बुधरापाये शरदि अगस्त्यो महर्षिः स्वप्रभावशक्त्या निहन्ति। तस्माद् घनात्यये शरदि विषं मन्दवीर्यत्वं प्रयाति॥ ४॥

गङ्गाधरः—केषु जङ्गमेषु केषु च स्थावरेषु तद्विषं न्यस्तमित्यत आह—सर्पा इत्यादि। सर्पादयो यावन्तः प्राणिनस्तेषां ये दंष्ट्रिणस्तेषां दंष्ट्रोत्थं विषं जाङ्गमं विषं मतम्। यद्यपि सुश्रुतेनोक्तम्—“जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोड़श। समासेन मया यानि विस्तरस्तेषु वक्ष्यते॥ तत्र दृष्टिनिश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्त्तवमुखसन्दंशविशर्द्धितगुदास्थिपित्त-शूकशवानीति। तत्र दृष्टिनिश्वासविषास्तु दिव्याः सर्पाः। भौमास्तु दंष्ट्राविषाः। मार्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिका-चतुष्पादकीटास्तथान्ये दंष्ट्रानखविषाः। चिपिटपिच्चटककषायवासिकसर्षप-वासिकतोठकवर्च्चःकीटकौण्डिल्यकाः शकृन्मूत्रविषाः। मूषिकाः शुक्रविषाः। लूताश्च लालमूत्रपुरीषमुखसन्दंशनखशुक्रार्त्तवविषाः। वृश्चिकविश्वम्भरराजीव-मत्स्योच्चाडिङ्गाः समुद्रवृश्चिकाश्च लालाविषाः। चित्रशिरःसरावकुर्दिशतदारु-कारिमेदकशारिकामुखा मुखसन्दंशविशर्द्धितमूत्रपुरीषविषाः। मक्षिकाकण-भजलायुका मुखसन्दंशविषाः। विषहतास्थिसर्पकण्टकवरटीमत्स्यास्थिचेत्यस्थि-विषाणि। शकुलीमत्स्यरक्तराजीवरकीमत्स्याश्च पित्तविषाः। सूक्ष्मतुण्डोच्चडिङ्ग-वरटीशतपदीशूकवलभिका शृङ्गीभ्रमराः शूकतुण्डविषाः। कीटसर्पदेहा गतासवः शवविषाः। शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः”। इति तेषां

क्लिन्नञ्च विसर्पति उत्क्लिष्टशक्तिकं भवति। अतएवाशीविषार्ताः अतिपीड़िता भवन्ति। अम्बुधराणां वृद्धिकारणं वर्षागमः। अगस्त्यप्रभावाच्च न हिनस्ति पराधिकारित्वाद्विषस्य॥ ४॥

चक्रपाणिः—सर्पा इत्यादिना जङ्गमस्थावरयोर्निर्द्दयं विषस्य सङ्क्षेपादेवाह। यद्यपि विषगुणा अग्रे उद्दिष्टास्तथापि गुणानां गुण्यपेक्षत्वात् अग्रे विषस्य गुणिनः स्थावरजङ्गमभेदभिन्नस्याभिधानं विषस्य कार्य्यकारणगुणप्राधान्यख्यापनार्थम्। सर्पादीनां भेदा अग्रत एव वक्तव्याः। आदि-ग्रहणात् तन्त्रान्तरोक्तानां ग्रहणम्। अत्र दंष्ट्रिसर्प-प्राधान्याद् दंष्ट्रिण इत्युक्तम्। तथा दंष्ट्रोत्थस्य सर्व्वविषप्राधान्यात्। अदंष्ट्रोत्थानामपि उन्दुरुविषादीनां ग्रहणम्। जङ्गमस्य विषस्य उक्ता-

Indira Gandhi National Centre for the Arts

मुस्तकं पुष्पकं क्रौञ्चवत्सनाभं बलाहकम्।
कर्कटं कालकूटञ्च करवीरकसंज्ञकम्॥
पालकेन्द्रायुधं तैलं मेघकं कुशपुष्पकम्।
रोहिषं पुण्डरीकञ्च लाङ्गलकाञ्जनाभकम्॥
सङ्कोचं मर्कटं शृङ्गीविषं हालाहलं तथा।
एवमादीनि चान्यानि मूलजानि स्थिराणि च॥ ६॥

दंष्ट्रोत्थमेव विषं जङ्गमं मतमित्यवधारणं नोक्तं प्राधान्याद्दंष्ट्रोत्थं विषं जङ्गममुक्तम्। अन्यच्च जङ्गमसम्भवत्वाज्जङ्गममेव विषमिति ज्ञापनार्थं लूतादीनां सविषत्वेनोक्तिः कृता॥ ५॥

गङ्गाधरः—स्थावरयोनिविषमाह—मुस्तकमित्यादि। मुस्तकादिसंज्ञकानि मूलानि स्थिराणि विषाणि। यद्यपि सुश्रुते चोक्तं—'स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते। दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शाश्रयम्। मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च। निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः'॥ तत्र क्लीतकाश्वमारगुञ्जा-सुगन्धगर्गरककरघाटविद्युच्छिखाविजयानि इत्यष्टौ मूलविषाणि। विषपत्रिकालम्बावरदारुककरम्भमहाकरम्भाणि पञ्च पत्रविषाणि। कुमुद्वतीरेणुकाकरम्भमहाकरम्भककर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धासर्पघातिनन्दनसारपाकानीति द्वादश फलविषाणि। वेत्रकादम्बवल्लिजकरम्भमहाकरम्भाणि पञ्च पुष्पविषाणि। अन्त्रपाचककर्त्तरीयसौरीयककरघाटकरम्भनन्दनवराटकानि सप्त त्वक्सारनिर्य्यासविषाणि। कुमुदघ्नीस्नुहीजालक्षीर्य्याणि त्रीणि क्षीरविषाणि। फेनाश्मभस्म हरितालञ्च द्वे धातुविषे। कालकूटवत्सनाभसर्षपकपालककर्द्दमकवैराटकमुस्तकशृङ्गीविषप्रपौण्डरीकमूलकहालाहलमहाविषककर्कटकानीति त्रयोदश कन्दविषाणि। इत्येवं पञ्चपञ्चाशत् स्थावरविषाणि भवन्ति। चत्वारि वत्सनाभानि मुस्तके द्वे न्यधिष्ठानानि षोड़श दृष्टिनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालास्पर्शमुखसन्दंशविशर्द्धितगुदास्थिपित्तशूकशवानि देहे पतितानि इत्याहुः॥ ५॥

चक्रपाणिः—स्थावरजे विषे मूलजानीति पदं मूलजस्य बहुत्वात् प्राधान्याच्च। तेन पत्रपुष्पादिजानामपि विषाणां ग्रहणम्। यदुक्तं सुश्रुते-'मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सार एव तु। निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृत इति। कन्दस्त्विह मूलशब्देनैव गृहीतः। एतेषाञ्च संज्ञासम्बन्धे शबरकिरातादय एव तद्विद्याः प्रमाणं, ते हि गुरुपरम्परया व्याख्यानयन्ति॥ ६॥

गरं संयोगजश्चान्यत् गरसंज्ञं गदप्रदम् ।
कालान्तरविपाकित्वान्न तदाशु हरेदसून् ॥ ७ ॥
निद्रां तन्द्रां क्लमं दाहमपाकं लोमहर्षणम् ।
शोथञ्चैवातिसारञ्च कुरुते जङ्गमं विषम् ॥
स्थावरन्तु ज्वरं हिक्कां दन्तहर्षं गलग्रहम् ।
फेणच्छर्द्यरुचिश्वासान् मूर्च्छाञ्च जनयेद्भृशम् ॥ ८ ॥

प्रकीर्त्तिते। षट् चैव सर्षपान्याहुः शेषाण्येकैकमेव च" इति तथापि मुस्तकादि कन्दविषाणि, तथैवमादीनि चान्यानि मूलजानि स्थिराणि चेत्युक्त्या पत्र-पुष्पादीनि संगृहीतानीह चान्यानीति पदेन ततो न विरोधः ॥ ६ ॥

गङ्गाधरः—गरमित्यादि। आभ्यामन्यद्विषं गरं तत् तु संयोगजं गरसंज्ञं गदप्रदं भवेत्। गदप्रदत्वाद्विषं कालान्तरे विपाकित्वात् तद् गरमाशु नासून् हरेत् ॥ ७ ॥

गङ्गाधरः—निद्रामित्यादि। जङ्गमविषस्य निद्रादिकं सामान्यलिङ्गम्। स्थावरन्त्वित्यादि। स्थावरविषस्य ज्वरादिजननं सामान्यं कर्म्म ॥ ८ ॥

चक्रपाणिः—स्थावरजङ्गमसम्भवमेव तृतीयं विषमाह—गरसंयोगजमित्यादि। गरार्थाः संयोग एषां ते गरसंयोगाः द्रव्यभेदास्तेभ्यो जातं गरसंयोगजम्। गरं तन्त्रे संज्ञा यस्य तत् गरसंज्ञं चिरकारित्वाद्रोगजनकं न आशुप्राणहरम्। एतदेवाह—कालान्तरेत्यादि। सुश्रुतेऽपि त्रिविधमेव विषमुक्तम् 'स्थावरं जङ्गमं चैव कृत्रिमं विषमि'त्यनेन। यत् तु दूषीविषमग्रे वक्ष्यति तत् त्रिविधान्तर्गतं दर्शयिष्यामः। गरन्तु द्विविधं निर्विषद्रव्यसंयोगकृतं तथा सविषद्रव्यसंयोगकृतम्। तत्राद्यं गरसंज्ञं उत्तरं तु कृत्रिममिति व्यवस्था। इमां व्यवस्थां गृहीत्वैवमुक्तं रसायनीये। 'दंष्ट्राविषे मूलविष सगरे कृत्रिमे विषे' इति। तथा वृद्धकाश्यपेऽप्युक्तं—'संयोगजञ्च द्विविधं तृतीयं विषमुच्यते। गरं स्यादविषं तत्र सविषं कृत्रिमं मत'मिति ॥ ७ ॥

चक्रपाणिः—निद्रामित्यादिना तथा ज्वरमित्यादिना जङ्गमस्थावरविषस्य लिङ्गानि, जङ्गमस्थावरयोः परस्परोपरोधात् ॥ ८ ॥

जङ्गमं स्यादूर्द्ध्वभागमधोभागन्तु मूलजम्।
तस्माद्दंष्ट्राविषं मौलं हन्ति मूलञ्च दंष्ट्रिजम्॥ ९॥

गङ्गाधरः—तयोर्गुणभेदमाह—जङ्गमं स्यादित्यादि। जङ्गममिह दंष्ट्राविषं दंष्ट्राविषमूलविषयोरेवोर्द्ध्वगत्यधोगतिस्वभावात् परस्परोपघातित्वं नत्वन्येषां पुष्पादिलालादिविषाणां गतिभेदेऽपि परस्परोपघातित्वं तत्स्वभावात्। विशेषणमुक्तं सुश्रुते—"उद्वेष्टनं मूलविषैः प्रलापो मोह एव च। जृम्भाङ्गोद्वेष्टनश्वासा ज्ञेयाः पत्रविषेण तु। मुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव च। भवेत् पुष्पविषैश्छर्द्दिराध्मानं मोह एव च। त्वक्सारनिर्य्यासविषैरुपयुक्तैर्भवन्ति हि। आस्यदौर्गन्ध्य-पारुष्य-शिरोरुक्-कफसंस्रवाः। फेणागमः क्षीरविषे विड्भेदो जिम्भजिह्वता। हृत्पीड़नं धातुविषैर्मूर्च्छा दाहश्च तालुनि। प्रायेण कालघातीनि विषाण्येतानि निर्द्दिशेत्। कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरम्। स्पर्शाज्ञानं कालकूटैर्वेपथुः स्तम्भ एव च। ग्रीवाभङ्गो वत्सनाभे पीतविण्मूत्रनेत्रता। सर्षपे वातवैगुण्यमानाहो ग्रन्थिजन्म च। ग्रीवादौर्बल्य-वाक्सङ्गौ पालकेऽनुमताविह। प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता। वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते। गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु। शृङ्गीविषेणाङ्गसाददाहोदरविवृद्धयः। पुण्डरीकेण रक्तत्वमक्ष्णोर्वृद्धिस्तथोदरे। वैवर्ण्यं मूलकैश्छर्द्दिहिक्काशोफप्रमूढ़ताः। चिरेणोच्छ्वसिति श्यावो नरो हालाहलेन च। महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशम्। कर्कटेनोत्पतत्यूर्द्ध्वं हसन् दन्तान् दशत्यपि। कन्दजान्युग्रवीर्य्याणि प्रयुक्तानि त्रयोदश। सर्व्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः। रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च। विकाशि विशदञ्चैव लघ्वपाकि च तत् स्मृत"मिति॥ ९॥

चक्रपाणिः—तद्गतधर्म्ममभिधाय हेतुमत्परस्परोपघातकत्वमाह—जङ्गममित्यादि। तस्मादिति परस्परं विरुद्धगामित्वात्। एतेन च यद्वक्ष्यति दंष्ट्रिविषं मौलं हन्ति मौलञ्च दंष्ट्रिजम्। तदुपपन्नं भवति। ननु, विषं विषघ्नमुक्तम् यत् प्रभावस्तत्र कारणमिति—आत्रेयभद्रकाप्यीये प्रभावेण विषस्य विषहरणाभिधानात् इत्युपपत्तिविरुद्धं वर्णनम्। यदि प्रभावः कारणं न स्यात् तदा यत्किञ्चिदूर्द्ध्वभागं मदनफलादि तद् दंष्ट्राविषहरं स्यात्। यद्वाधोभागं त्रिवृतादि तद् मौलविषं हन्यात्। नचैतद्दृष्टम्, तस्मात् प्रभावस्यैवानुगुणे ईषन्मात्रकारणमेतत् अधोभागत्वमूर्द्ध्वभागत्वञ्चेति॥ ९॥

तृण्मोहदन्तहर्षप्रसेकवमथुक्लमा भवन्त्यादे।
वेगे रसप्रदोषादसृक्प्रदोषाद्द्वितीये तु॥
वैवर्ण्यभ्रमवेपथजृम्भामूर्च्छाङ्गभङ्गचिमिचिमातङ्काः।
दुष्टपिशितात्तृतीये मण्डलकण्डूसहितकोठाः॥
वातादिजाश्चतुर्थे दाहच्छर्द्यङ्गशूलमूर्च्छाद्याः।
नीलादीनां तमसश्च दर्शनं पञ्चमे वेगे॥
षष्ठे हिक्का भङ्गः स्कन्धे स्यात्तु सप्तमेऽष्टमे मरणम्।
नृणां चतुष्पदां स्याच्चतुर्व्विधः पक्षिणां त्रिविधः॥ १०॥

<u>गङ्गाधरः</u>—पूर्व्वमष्टवेगमित्युक्तं तदाह। तृण्मोहेत्यादि। स्थावरविषाणां उपयोगादादे वेगे रसधातुप्रदूषणात् तृड़ादयो भवन्ति। सुश्रुते ह्युक्तम्। "स्थावरस्योपयुक्तस्य वेगे तु प्रथमे नृणाम्। श्यावा जिह्वा भवेत् स्तब्धा मूर्च्छा श्वासश्च जायते"। द्वितीये तु वेगेऽसृक्प्रदोषात् वैवर्ण्यादयो भवन्ति। सुश्रुते च 'द्वितीये वेपथुः स्वेदो दाहः पाण्डुरुजस्तथा। विषमामाशयप्राप्तं कुरुते हृदि वेदनाम्' इति। तृतीये वेगे दुष्टपिशितान्मांसप्रदूषणान्मण्डलादयो भवन्ति। सुश्रुते च "तालुशोषं तृतीये तु शूलं चामाशये भृशम्। दुर्व्वर्णे हरिते शूने जायेते चास्य लोचने"। इति। वातादिजाश्चतुर्थे वेगे वातादिप्रदूषणाद् दाहादयः स्युः। सुश्रुते च "पक्वाशयगते तोदो हिक्का कासोऽन्त्रकूजनम्। चतुर्थे जायते वेगे शिरसश्चातिगौरवम्" इति। नीलादीनामिति। पञ्चमे वेगे नीलादीनां दर्शनं तमसश्च दर्शनं स्यादिति। सुश्रुते च "कफप्रसेको वैवर्ण्यं पर्व्वभेदश्च पञ्चमे। सर्व्वदोषप्रकोपश्च पक्वाधाने च वेदना" इति। षष्ठे वेगे हिक्का स्यात्। सुश्रुते च "षष्ठे प्रज्ञाप्रणाशश्च भृशं वाप्यतिसार्य्यते" इति। भङ्ग इत्यादि। सप्तमे वेगे स्कन्धे भङ्गः स्यात्। अष्टमे वेगे मरणं स्यादिति सप्तमवेगस्य चरमावस्थवेगोऽष्टम इष्ट इह तन्त्रे। सुश्रुते तु सप्तैव वेगा उक्तास्तत्र सप्तमे सन्निरोधो मरणं चरमावस्थामभिप्रेत्योक्तम्। "स्कन्ध-पृष्ठ-कटीभङ्गः सन्निरोधश्च सप्तमे" इति। इत्येवं लक्षणं नृणां स्यात्।

<u>चक्रपाणिः</u>—तृण्मोहेत्यादिना दंष्ट्रिविषवेगलक्षणमाह— सुश्रुते 'एकैककलातिक्रमेण सप्तवेगा उदीरिताः। इह कलालङ्घन इति सप्तवेगाः, अष्टमे तु सप्तकलालङ्घनोत्तरकालं मारको वेग'

आद्ये भ्रमति चतुष्पदोऽवसीदति ततः शून्यः।
मन्दाहारो म्रियते श्वासेन चतुर्थवेगे तु॥
ध्यायत्याद्ये वेगे पक्षी प्रभ्राम्यति द्वितीये तु।
स्रस्ताङ्गश्च तृतीये विषवेगे याति पञ्चत्वम्॥ ११॥
लघु रूक्षमाशु विशदं व्यवायि तीक्ष्णं विकाशि सूक्ष्मञ्च।
उष्णमनिर्देश्यरसं दशगुणमुक्तं विषं तज्ज्ञैः॥
रौक्ष्याद्वातमशैत्यात् पित्तं सौक्ष्म्यादसृक् प्रकोपयति।
कफमव्यक्तरसत्वादन्नरसांश्चानुवर्त्तेत॥

अथ चतुष्पदां गानाह। चतुष्पदां चतुर्व्विधो वेगः स्यात्। पक्षिणां त्रिविधः॥ १०॥

<u>गङ्गाधरः</u>—आद्य इत्यादि। चतुष्पदो विषोपयोगादाद्ये वेगे भ्रमति घूर्णते। ततो द्वितीये वेगेऽवसीदति। ततः तृतीये वेगे शून्य इव सन् मन्दाहारो भवति। चतुर्थवेगे तु श्वासेन म्रियते। ध्यायतीत्यादि। पक्षी स्थाव-विषोपयोगादाद्ये वेगे ध्यायति। द्वितीये तु प्रभ्राम्यति घूर्णते। तृतीये विषवेगे स्तब्धाङ्गः सन् पञ्चत्वं यातीति। इति विषाणां स्थावराणामष्टवेगा उक्ताः॥११॥

<u>गङ्गाधरः</u>—अथ दशगुणं विषमिति यदुक्तं तदाह—लघ्वित्यादि। आशुकारित्वमाशुगुणः। व्यवायीति। व्यवायी देहमखिलं व्याप्य पाकाय कल्पते। विकाशीति। विकाशी विकशत्येवं सन्धिबन्धं विमोक्षयन्। प्रतिगुणतः कर्म्माण्याह—रौक्ष्यादित्यादि। विषमित्यनुवर्त्तते। विषं रौक्ष्याद् वातं प्रकोपयति। अशैत्यादुष्णत्वात् पित्तं प्रकोपयति। सौक्ष्म्याद्

इति सुश्रुते विशेषः। वातादिजा इति यथायोग्यतया एकदोषद्विदोषत्रिदोषजाः, आदिशब्दः प्रकारवाची। सुश्रुतवचनान्नीलादीनामित्यत्र आदिशब्देन प्रधानवाचिना नीलप्रधानेतर-वर्णदर्शनं भवति। षष्ठ हिक्केति च्छेदः। विषवेगप्रस्तावात् चतुष्पादपक्षिणोऽपि विषवेगानाह। एतद् वेगाभिधानेन विषवेगहतस्य मांसं नोपादेयम्। यतस्तस्य विषार्दितस्य सर्व्वं शरीरं विषवद् भवति। चतुष्पादादीनां अन्यवेगत्वं सत्वान्यत्वात्। अवसीदतीत्यादि द्वितीये। शून्य इत्यादि तृतीये॥ १०। ११॥

<u>चक्रपाणिः</u>—विषगुणानाह—लघ्वित्यादि। प्रत्येकं गुणानां कार्य्यमाह। अशैत्यादिति उष्णत्वात्। सौक्ष्म्यादसृक् प्रकोपणं असृजोऽपि सूक्ष्ममार्गानुसारित्वात्। अव्यक्तरसत्वात् कफम्।

शीघ्रं व्यवायिभावादाशु व्याप्नोति केवलं कायम्।
तीक्ष्णत्वान्मर्म्मघ्नं प्राणघ्नं तद्‌ विकाशित्वात्॥
दुरुपक्रमं लघुत्वाद्वैशद्यात् स्यादसक्तगतिदोषात्॥ १२॥

असृक् प्रकोपयति अव्यक्तरसत्वात् कफं प्रकोपयति अनुरसांश्चानुवर्त्तते। शीघ्रत्वाद् व्यवायित्वाच्च केवलं कृत्स्नं कायमाशु व्याप्नोति। तीक्ष्णत्वान् मर्म्मघ्नं विकाशित्वात् तद्विषं प्राणघ्नमिति। लघुत्वाद् दुरुपक्रमं दुश्चिकित्स्यम्। कस्मात्? वैशद्यात् असक्तगतिदोषात्। वैशद्यगुणतो विषेण दोषाः प्रकुपिताः सक्तगतयो यतो न स्युरस्थिरगतय एव दोषाः स्युस्तस्माल्लाघवाद् दुरुपक्रमं भवति विषम्। इति दश गुणकर्म्माणि सुश्रुते चोक्तानि। "तद्रौक्ष्यात् कोपयेद् वायुमौष्ण्यात् पित्तं सशोणितम्। मानसं मोहयेत् तैक्ष्ण्यादङ्गबन्धान् छिनत्त्यपि। शरीरावयवान् सौक्ष्म्यात् प्रविशेद् विकरोति च। आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं भजेत्। क्षपयेच्च विकाशित्वाद् दोषान् धातून् मलानपि। वैशद्यादतिरिच्येत दुश्चिकित्स्यश्च लाघवात्। दुर्ज्जरश्चाविपाकित्वात् तस्मात् क्लेशयते चिरम्। स्थावरं जङ्गमं यच्च कृत्रिमं चापि यद्विषम्। सद्यो व्यापादयेत् तत् तु ज्ञेयं दशगुणान्वितम्" इति॥ १२॥

अत्रग्रहणेन योगवाही भवति, विषमपि रसमांसाद्यनुयातं सर्व्वत्रानुगतं भवति। शीघ्रमित्यादौ शीघ्रत्वादाशु व्याप्नोति, व्यवायित्वात् केवलं देहं व्याप्नोतीति विज्ञेयम्। व्यवायित्वं सर्व्वतः प्रसरणशीलत्वं पानीयपतिततैलवत्। तीक्ष्णत्वान्मर्म्मघ्नमिति। मर्म्मणां सौम्यानां मृदूनां तीक्ष्णेन विरुद्धत्वात् बोद्धव्यम्। विकासित्वादिति विकसनशीलत्वात्। सर्व्वत्र हि कस् हिंसार्थः। लघुत्वादित्यनवस्थितत्वात्। यस्य चानवस्थितत्वं तस्य भेषजेणोपक्रममकिञ्चित्करम्। असक्ता विश्रान्ता दोषेषु गतिर्यस्य तत् असक्तगतिदोषं लघुत्वादनवस्थितत्वम्। विशदं पिच्छाभागरहितत्वात् क्वचिन्न सज्जति। अत्र च गुणानां प्रतिनियमेन विरुद्धकर्म्मकरणे विषस्यासिद्धत्वमेव ज्ञेयम्। तेन रूक्षादिभिः श्लेष्मक्षयात् यद् द्रवाशङ्कनीयं सुश्रुते च विषगुणे अपाकित्वमुक्तं तदाशुकारिविषे तु प्रयोजनमिति नेहोक्तम्। तथाहि विषिनस्तावन्तं कालमपेक्षन्ते येन यावद्रसस्य पाको भवत्यविचार्य्यं। सुश्रुते च कालान्तरप्रकोपादि यदद्वयमुक्तं तदिहापि दूषीविषे चिन्तनीयमिति॥ १२॥

दोषस्थानप्रकृतीः प्राप्यान्यतमं ह्युदीरयेत्।
स्याद्वातिकस्य वातस्थाने कफपित्तलिङ्गमीषत्तु।
तृण्मोहारतिमूर्च्छागलग्रहच्छर्दिफेणादि॥
पित्ताशयस्थितं पैत्तिकस्य कफपित्तयो-*-र्विषं तद्वत्।
तृट्कासज्वरवमथुक्लमदाहतमोऽतिसारादि॥
कफदेशगतं कफाधिकस्य † वातपित्तयोश्च दर्शयति।
लिङ्गं श्वासगलग्रहकण्डूलालावमथ्वादि॥ १३॥
दूषीविषञ्च शोणितदुष्ट्यारुःकिटिमकोठलिङ्गञ्च।
विषमेकैकं दोषं सन्दूष्य हरत्यसूनेवम्॥

गङ्गाधरः—दोषेत्यादि। दोषस्थानप्रकृतीनामन्यतमं प्राप्य हि यस्माद् विषं दोषस्थानप्रकृतीरुदीरयेत्। तद्यथा। स्यादित्यादि। वातिकस्य षड्विंशतिजातिदर्व्वीकरस्य सर्पस्य, वातस्थाने स्थितं ईषत् कफपित्तलिङ्गं तृण्मोहादि फेनान्तमुदीरयेत्। पित्ताशयेत्यादि। पैत्तिकस्य द्वाविंशतिजातिमण्डलिनः सर्पस्य विषं पित्ताशयस्थितं कफवातयोर्लिङ्गं तृट्कासादि तद्वत् किञ्चिदुदीरयेत्। कफेत्यादि। कफदेशगतं विषं, कफाधिकस्य दशविधस्य राजिमतः सर्पस्य विषं वातपित्तयोर्लिङ्गं श्वासादिकमीषत् दर्शयति॥ १३॥

गङ्गाधरः—दूषीविषञ्चेत्यादि। दूषीविषञ्च स्थावरजङ्गमकृत्रिमान्यतरं विषं विषघ्नौषधादिभिर्हतवीर्य्यं देहादनिर्गतं विषं, शोणितदुष्ट्या खलवरुर्व्रणः, व्रणप्रभृतिलिङ्गञ्च दर्शयति। दूषीविषत्वं यथा स्याद्विषं तदुक्तं

चक्रपाणिः—सम्प्रति स्थानविशेषप्राप्त्या लिङ्गविशेषानाह—वातिकस्येत्यादि। विषं मद्यं यद्यपि त्रिदोषकोपनं स्थानप्रकृतिविशेषप्राप्त्या तद्दोषप्रकोपमधिकं करोति। वातिकस्येति वातप्रकृतेः। वातस्थाने पक्वाशयादौ कफपित्तलिङ्गमीषदितिवचनेन वातलिङ्गानि बहूनि भवन्ति तानि तृष्मूर्च्छेत्यादिनोक्तानि ज्ञेयानि। एवं उत्तरत्रापि योज्यम्। कफवातयोस्तद्वदिति ईषदित्यर्थः। कफस्येत्यादौ चकारात्कफप्रकृतेरित्यर्थः। ईषद्वातपित्तयोरिति योज्यम्॥ १३॥

चक्रपाणिः—दूषीविषलक्षणमाह—दूषीत्यादौ। कोठो वरटीदंशशोथाकारः। कालान्तरप्रकोपं दूषीविषम्। उक्तञ्चान्यत्र 'यस्माद् दूषयते धातून् तस्माद्दूषीविषं स्मृत'मिति। एवम्भूतञ्च गरमेव प्रायो भवति। तथा स्थावरं जङ्गमञ्च भवति। यदुक्तं सुश्रुते "जीर्णं

* कफवातयोरिति चक्रसम्मतः पाठः। † कफस्य दर्शयेद् वातपित्तयोश्चैतत् इति चक्रसम्मतः पाठः।

क्षरति विषतेजसास्रक् तत् खानि निरुध्य मारयति जन्तुम् ।
पीतं मृतस्य हृदि तिष्ठति दष्टविद्धयोर्दंशदेशे स्यात् ॥
नीलौष्ठदंशदन्तशैथिल्यकेशपतनाङ्गभङ्गविक्षेपाः ।
शिशिरैर्न लोमहर्षो नाभिहते दण्डराजी स्यात् ।
क्षतजं क्षताच्च नायात्येतानि भवन्ति मरणलिङ्गानि ॥ १४ ॥

सुश्रुते । "यत् स्थावरं जङ्गमकृत्रिमं वा देहादशेषं यदनिर्गतं तत् । जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा । स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति ॥ वीर्य्याल्पभावान्न निपातयेत् तत् कफावृतं वर्षगणानुबन्धि । तेनार्दितो भिन्नपुरीषवर्णो विगन्धवैरस्यमुखः पिपासी । मूर्च्छन् वमन् गद्गदवाग्विषण्णो भवेच्च दूष्योदरलिङ्गजुष्टः ॥ आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी । भवेन्नरो ध्वस्त-शिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः ॥ स्थितं रसादिष्वथवा यथोक्तान् करोति धातुप्रभवान् विकारान् । कोपश्च शीतानिलदुर्दिनेषु यात्याशु पूर्व्वं शृणु तत्र रूपम् ॥ निद्रागुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षावथवाङ्गमर्दः । ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठमोहान् ॥ धातुक्षयं पादकरास्यशोफं दकोदरं छर्दिमथातिसारम् । वैवर्ण्यमूर्च्छाविषमज्वरान् वा कुर्य्यात् प्रवृद्धां प्रबलां तृषां वा । उन्मादमन्यज्जनयेत् तथान्यदानाहमन्यत् क्षपयेच्च शुक्रम् । गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान् विकारांश्च बहुप्रकारान् ॥ दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः । यस्माद् दूषयते धातूंस्तस्माद्दूषीविषं स्मृतम्" इति। अथ विषं यथा मारयति तदाह—विषमित्यादि । विषं खल्वेकैकं दोषं वातादिकं सन्दूष्यासून् हरति । एवं विषतेजसाऽस्रक् रक्तं क्षरति तच्च विषं खानि गलश्रोत्रनेत्रादीनां खानि रन्ध्राणि निरुध्य जन्तुं मारयति। अथ पीतादिविषस्थितिस्थानमाह—पीतमित्यादि । पीतं विषं मृतस्य हृदि तिष्ठति । दष्टस्य विद्धस्य च मृतस्य दंशदेशे वेधदेशे च स्थितं स्यात् । नीलौष्ठादयश्च दष्टविद्धयोः स्युः । शिशिरैरतिहिमैर्जलैर्लोमहर्षो न

विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा । स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति ।" इहापि दूषीविषाः कीटाः हीनवीर्य्यविषा वक्तव्याः । विषमेकैकमित्यादिना स्याद्वातिकस्येत्यादिना यदुक्तं तस्यैकैकदोषस्यात्यर्थंकोपमाह—संदूष्येति अत्यर्थं दूषयित्वा । क्षरतीत्यादिना पीतविषलक्षणमाह । विषं मृतस्य हृदि तिष्ठति, दष्टविद्धयोः

Indira Gandhi National Centre for the

स्याद, दण्डाभिहते दण्डराजी दण्डस्य रेखा न स्यात्। क्षताच्च दंशन-वेधनक्षताच्च क्षतजं रक्तं नायाति। एतानि पीतविषस्य दष्टविद्धयोर्मरण-लक्षणानि भवन्ति। अत्र सुश्रुते चोक्तम्—"जङ्गमस्य विषस्योक्तान्यधि-ष्ठानानि षोड़श। समासेन मया यानि विस्तरस्तेषु वक्ष्यते। तत्र दृष्टि-निश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्त्तव-मुखसन्दंशविशर्द्धितगुदास्थिपित्तशूक-शवानीति। तत्र दृष्टिनिश्वासविषा दिव्याः सर्पाः। भौमास्तु दंष्ट्राविषाः। मार्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिकाचतुष्पाद-कीटास्तथाऽन्ये दंष्ट्रानखविषाः। चिपिटपिच्चटककषायवासिकसर्षपवासिक-तोटकवर्च्चःकीटकौण्डिल्यकाः शकृन्मूत्रविषाः। मूषिकाः शुक्रविषाः। लूताश्च लालामूत्रपुरीषमुखसन्दंशनखशुक्रार्त्तवविषाः। वृश्चिक-विश्वम्भर-राजीव-मत्स्योच्चिड़िङ्गाः समुद्रवृश्चिकाश्च लालाविषाः। चित्रशिरःसरावकुर्द्दिशतदारुकारि-मेदकशारिकामुखा मुखसन्दंशविशर्द्धितमूत्रपुरीषविषाः। मक्षिकाकणभजलायुका मुखसन्दंशविषाः। विषहतास्थिसर्पकण्टकवरटीमत्स्यास्थि चेत्यस्थिविषाणि। शकुलीमत्स्यरक्तराजीचरकीमत्स्याश्च पित्तविषाः। सूक्ष्मतुण्डोच्चिड़िङ्गवरटी-शतपदी-शूकवलभिका-शृङ्गी-भ्रमराः शूकतुण्डविषाः। कीटसर्पदहा गतासवः शवविषाः। शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः। भवन्ति चात्र। राज्ञोऽरिदेशे रिपवस्तृणाम्बुमार्गान्नधूमश्वसनान् विषेण। सन्दूषयन्त्येभिरति-प्रदुष्टान् विज्ञाय लिङ्गैरभिशोधयेच्च॥ दुष्टं जलं पिच्छिलमुग्रगन्धि फेनान्वितं राजिभिरावृतञ्च। मण्डूकमत्स्यं म्रियते विहङ्गा मत्ताश्च सानूपचरा भ्रमन्ति॥ मज्जन्ति ये चात्र नराश्वनागास्ते च्छर्दिमोहज्वरदाहशोफान्। गच्छन्ति तेषा-मपहृत्य दोषान् दुष्टं जलं शोधयितुं यतेत॥ धवाश्वकर्णासनपारिभद्राः सपाटलाः सिद्धकमोक्षकौ च। दग्धाः सराजद्रुमसोमवल्कास्तद्भस्म शीतं वितरेत् सरःसु। भस्माञ्जलिश्चापि घटे निधाय विशोधयेदीप्सितमेवमम्भः॥ १॥ क्षितिप्रदेशं विषदूषितन्तु शिलास्थलीं तीर्थमथेरिणं वा। स्पृशन्ति गात्रेण तु येन येन गोवाजिनागोष्ट्रखरा नरा वा। तच्छूनतां यात्यथ दह्यते च विशीर्य्यते लोमनखास्तथैव॥ तत्राप्यनन्तां सह सर्व्वगन्धैः पिष्ट्वा सुराभिर्विनियोज्य मार्गम्। सिञ्चेत् पयोभिस्तु मृदन्वितैस्तं विड़ङ्गपाठाकटभीजलैर्वा। ॥ २॥ तृणेषु भक्तेषु च दूषितेषु सीदन्ति मूर्च्छन्ति वमन्ति चान्ये। विड़्भेद-

दंशदेशे विषं स्यात्। विषमृतस्य विशेषज्ञानार्थं लक्षणमाह—नीलौष्ठेत्यादि। दण्डराजिः दण्डकारा रेखा॥ १४॥

मूर्च्छन्त्यथवा म्रियन्ते तेषां चिकित्सां प्रणयेद् यथोक्ताम्॥ विषापहै-र्वाप्यगदैर्विलिप्य वाद्यानि चित्राण्यपि वादयेत। तारः सुतारः ससुरेन्द्रगोपः सर्व्वैश्च तुल्यः कुरुविन्दभागः। पित्तेन युक्तैः कपिलान्वयेन वाद्यप्रलेपो विहितः प्रशस्तः॥ वाद्यस्य शब्देन हि यान्ति नाशं विषाणि घोराण्यपि यानि सन्ति॥३॥ धूमेऽनिले वा विषसम्प्रयुक्ते खगाः श्रमार्त्ताः प्रपतन्ति भूमौ। कासप्रतिश्याय-शिरोरुजश्च भवन्ति तीव्रा नयनामयाश्च॥ लाक्षाहरिद्रातिविषाभयाब्दहरेणु-कैलादलवल्ककुष्ठम्। प्रियङ्गुकाश्चाप्यनले निधाय धूमानिलौ चापि विशो-धयेत॥४॥ इति। सवातं गृहधूमाभं पुरीषं योऽतिसार्य्यते। आध्मातो-ऽत्यर्थमुष्णास्रो विवर्णः सादपीड़ितः। उद्वमत्यथ फेनञ्च विषपीतं तमादिशेत्॥ न चास्य हृदयं वह्निर्विषदुष्टं दहत्यपि। तद्धि स्थानं चेतनायाः स्वभावाद् व्याप्य तिष्ठति॥ स्वभावादेव तिष्ठेत् तु महारादंशयोर्विषम्। व्याप्य सावयवं देहं दिग्धविद्धाहिदष्टयोः। लौल्याद्विषान्वितं मांसं यः खादेत् मृतमात्रयोः। यथाविषं स रोगेण क्लिश्यते म्रियतेऽपि वा। अतश्चाप्यनयोर्मांसमभक्ष्यं मृतमात्रयोः। मुहूर्त्तात् तदुपादेयं महारादंशवर्ज्जितम्"॥ इति। असाध्यता चोक्ता। "अश्वत्थदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु। याम्ये सार्पत्रे परिवर्ज्जनीया ऋक्षे नरा मर्म्मसु ये च दष्टाः॥ दर्व्वीकराणां विषमाशु-घाति सर्व्वाणि चोष्णैर्द्विगुणी भवन्ति। अजीर्णपित्तातपपीड़ितेषु बाल-प्रमेहिष्वथ गर्भिणीषु। वृद्धातुरक्षीणबुभुक्षितेषु रूक्षेषु भीरुष्वथ दुर्द्दिनेषु। शस्त्रक्षते यस्य न रक्तमेति राज्यो लताभिश्च न सम्भवन्ति। शीताभिरद्भिश्च न लोमहर्षो विषाभिभूतं परिवर्ज्जयेत् तम्॥ जिह्वा सिता यस्य च केशशातो नासावभङ्गश्च सकण्ठभङ्गः। कृष्णः सरक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वञ्च स वर्ज्जनीयः॥ वर्त्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्द्ध्वमधश्च यस्य। दंष्ट्रा-निपाताः सकलाश्च यस्य तञ्चापि वैद्यः परिवर्ज्जयेत् तु। उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाप्यथवा विवर्णम्। सारिष्टमत्यर्थमवेगिनञ्च जह्याच्च तं कर्म्म न तत्र कुर्य्यादिति।

अथ विषविज्ञानीये। धन्वन्तरिं महाप्राज्ञं सर्व्वशास्त्रविशारदम्। पादयोरुपसंगृह्य सुश्रुतः परिपृच्छति॥ सर्पसङ्ख्यां विभागञ्च दष्टलक्षणमेव च। ज्ञानञ्च विषवेगानां भगवन् वक्तुमर्हसि॥ तस्य तद् वचनं श्रुत्वा प्राब्रवीद् भिषजां वरः। असङ्ख्या वासुकिमुखा विख्यातास्तक्षकादयः॥ महीधराश्च नागेन्द्रा हुताग्निसमतेजसः। ये चाप्यजस्रं गर्ज्जन्ति वर्षन्ति च

तर्पन्ति च॥ ससागरगिरिद्वीपा यैरियं धार्य्यते मही। क्रुद्धा निःश्वासदृष्टिभ्यां ये हन्युरखिलं जगत्॥ नमस्तेभ्योऽस्ति तेषां न कार्य्यं किञ्चित् चिकित्सया। ये तु दंष्ट्राविषा भौमा ये दशन्ति च मानुषान्। तेषां सङ्ख्यां प्रवक्ष्यामि यथावदनुपूर्व्वशः॥ अशीतिरेव सर्पाणां भिद्यते पञ्चधा तु सा॥ दर्व्वीकरा मण्डलिनो राजिमन्तस्तथैव च। निर्व्विषा वैकरञ्जाश्च त्रिविधास्ते पुनः स्मृताः। दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः। तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः। द्वाविंशतिर्मण्डलिनो राजिमन्तस्तथा दश। निर्व्विषा द्वादश ज्ञेया वैकरञ्जास्त्रयस्तथा। वैकरञ्जोद्भवाः सप्त चित्रामण्डलिराजिलाः। पदाभिमृष्टा दुष्टा वा क्रुद्धा ग्रासार्थिनोऽपि वा। ते दशन्ति महाक्रोधास्तेषां त्रैविध्यमुच्यते। सर्पितं रदितं वापि तृतीयमथ निर्व्विषम्। सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः। पदानि यत्र दन्तानामेकं द्वे वा वहूनि च। निमग्नान्यल्परक्तानि यान्युद्वृत्त्य करोति हि। चञ्चुमालकयुक्तानि वैकृत्यकरणानि च। संक्षिप्तानि सशोफानि विद्यात् तत् सर्पितं भिषक्॥ राज्यः सलोहिता यत्र नीलाः पीताः सितास्तथा। विज्ञेयं रदितं तत् तु ज्ञेयमल्पविषञ्च तत्॥ अशोफमल्पदुष्टासृक् प्रकृतिस्थस्य देहिनः। पदं पदानि वा विद्यादविषं तच्चिकित्सकः। सर्पस्पृष्टस्य भीरोर्हि भयेन कुपितोऽनिलः। कस्यचित् कुरुते शोफं सर्पाङ्गाभिहतं तु तत्॥ व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि तु। तथातिवृद्धबालातिदष्टमल्पविषं स्मृतम्। सुपर्णदेवब्रह्मर्षियक्षसिद्धनिषेविते। विषघ्नौषधियुक्ते च देशे न क्रमते विषम्॥ रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः। ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः॥ ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः। मण्डलैर्व्विविधैश्चित्राः पृथवो मन्दगामिनः। स्निग्धाः विविधवर्णाभिस्तिर्य्यग् ऊर्द्धन्तु राजिभिः। चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः॥ मुक्तारूप्यप्रभा ये च कपिला ये च पन्नगाः। सुगन्धिनः सुवर्णाभास्ते जात्या ब्राह्मणाः स्मृताः॥ क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भृशकोपनाः। सूर्य्यचन्द्राकृतिच्छत्रलक्ष्म तेषां तथाम्बुजम्॥ कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा। धूम्राः पारावताभाश्च वैश्यास्ते पन्नगाः स्मृताः॥ महिषद्वीपवर्णाभास्तथैव परुषत्वचः। भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्त्तिताः॥ कोपयन्त्यनिलं जन्तोः फणिनः सर्व्व एव तु। पित्तं मण्डलिनश्चापि कफञ्चानेकराजयः॥ अपत्यमसवर्णाभ्यां द्विदोषकरलक्षणम्। ज्ञेयौ दोषौ

च दम्पत्योर्विशेषश्चात्र वक्ष्यते ॥ रजन्याः पश्चिमे यामे सर्पाश्चित्राश्चरन्ति हि । शेषेषूक्ता मण्डलिनो दिवा दर्व्वीकराः स्मृताः ॥ दर्व्वीकरास्तु तरुणा वृद्धा मण्डलिनस्तथा । राजिमन्तो वयोमध्ये जायन्ते मृत्युहेतवः ॥ नकुलाद् दलिता बाला वारिविप्रहताः कृशाः । वृद्धा मुक्तत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः ॥ तत्र दर्व्वीकराः कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रूकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्प ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति ॥ मण्डलिनस्तु । आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसो वृद्धगोनसः पनसो महापनसो वेणुपत्रकः शिशुको मदनः पालिंहिरः पिङ्गलस्तन्तुकः पुष्पपाण्डुः षड़गोऽग्निको बभ्रुः कषायः कलुषः पारावतो हस्ताभरणश्चित्रक एणीपद इति ॥ राजिमन्तस्तु । पुण्डरीको राजिचित्रोऽङ्गुलराजिर्बिन्दुराजिः कर्द्दमकस्तृणशोषकः सर्षपकः श्वेतहनुर्दर्भपुष्पश्चक्रको गोधूमकः किक्किसाद इति ॥ निर्व्विषास्तु । गलगोली शूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतोरथः क्षीरिकः पुष्पकः अहिपताकोऽन्धाहिको गोराहिको वृक्षेशय इति ॥ वैकरञ्जास्तु त्रयाणां दर्व्वीकरादीनां व्यतिकराज्जाताः । तद यथा । माकुलिः पोटगलः स्निग्धराजिरिति । तत्र कृष्णसर्पेण गोनस्यां वैपरीत्येन वा जातो माकुलिः । राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः । कृष्णसर्पेण राजिमत्यां वैपरीत्येन वा जातः स्निग्धराजिरिति ॥ तेषामाद्यस्य पितृवद्विषोत्कर्षः, द्वयोर्मातृवदित्येके । त्रयाणां वैकरञ्जानां पुनर्दिव्येलकरोध्रपुष्पकराजिचित्रकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पो वेल्लितकः सप्त तेषामाद्यास्त्रयो राजिलवत् । शेषा मण्डालवत् । एवमेतेषां सर्पाणामशीतिरिति ॥ तत्र महानेत्रजिह्वास्यशिरसः पुमांसः । सूक्ष्मनेत्रजिह्वास्यशिरसः स्त्रियः । उभयलक्षणमन्दविषा अक्रोधा नपुंसका इति ॥ तत्र सर्व्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः । किं कारणम् ? विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यमाशुकारि मुहूर्त्तमप्युपेक्षितमातुरमभिपातयति । न चावकाशोऽस्ति वाक्समूहमनुसर्तुम् ॥ प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्पत्रैविध्यं भवति । तस्मात् त्रैविध्यमेव वक्ष्यामः । एतद्ध्यातुरहितमसम्मोहकरञ्च ॥ अपि चात्रैव सर्व्वस व्यञ्जनावरोधः ॥ तत्र दर्व्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसोगौरवं सन्धिवेदना कटीपृष्ठग्रीवा-

दौर्ब्बल्यं जृम्भणं वेपथुः स्वरावसादो घुघु रको जड़ता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूद्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेणागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति॥ मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्द्ध्वमधश्च मांसानामवशातनं श्वयथर्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति॥ राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षः स्तब्धत्वं गात्राणामादंशशोफः सान्द्रकफप्रसेकश्छर्द्दिरभीक्ष्नमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घु घु रक उच्छासनिरोधस्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति॥ पुरुषाभिदष्ट ऊर्द्ध्वं प्रेक्षतेऽधस्तात् स्त्रिया, सिराश्चोत्तिष्ठन्ति ललाटे। नपु सकदष्टस्तिर्य्यक्प्रेक्षी भवति। गर्भिण्या पाण्डुमुखो ध्मातश्च। सूतिकया शूलार्त्तो रुधिरं मेहत्युपजिह्विका चास्य भवति। ग्रासार्थिनान्नं काङ्क्षति, वृद्धेन मन्दा वेगाश्च। बालेनाशु मृदवश्च। निर्व्विषेणाविषलिङ्गं। अन्धाहिकेनान्धत्वमित्यैके॥ ग्रसनादजगरः शरीरप्राणहरो न विषात्। तत्र सद्यःप्राणहराहिदष्टः पतति शस्त्राशनिहत इव भूमौ स्तब्धाङ्गः स्वपितीति॥ तत्र सर्व्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति। तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति। तत् प्रदुष्टं कृष्णतामुपैति। तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति॥ द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति॥ तृतीये मेदो दूषयति। तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणश्च॥ चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति॥ पञ्चमेऽस्थीन्यनुप्रविशति। प्राणमग्निञ्च दूषयति। तेन पर्व्वभेदो हिक्का दाहश्च भवति॥ षष्ठे मज्जानमनुप्रविशति, ग्रहणीञ्चात्यर्थं दूषयति। तेन गात्राणां गौरवमतिसारो हृत्पीड़ा मूर्च्छा च भवति॥ सप्तमे शुक्रमनुप्रविशति। व्यानञ्चात्यर्थं कोपयति। कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति। तेन श्लेष्मवर्त्तिप्रादुर्भावः कटीपृष्ठभङ्गश्च सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छासनिरोधश्च भवति॥ १॥

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति। तत् तु प्रदुष्टं शीततामुपैति, तत्र परिदाहः पीतावभासता चाङ्गानां भवति॥ द्वितीये मांसं दूषयति, तेनात्यर्थं पीतता-परिदाहौ दंशे श्वयथुश्च भवति। तृतीये मेदो दूषयति, तेन पूर्व्ववच्चक्षुर्ग्रहणं तृष्णा दंशे क्लेदः स्वेदश्च भवति॥ चतुर्थे कोष्ठमनु प्रविश्य ज्वरमापादयति॥ पञ्चमे परिदाहं सर्व्वगात्रेषु करोति। षष्ठसप्तमयोः

पूर्व्ववत्॥२॥ राजिमतां प्रथमे वेगे विषं शोणितं दूषयति। तत् प्रदुष्टं पाण्डुतामुपैति, तेन लोमहर्षः शुक्लावभासश्च पुरुषो भवति। द्वितीये मांसं दूषयति, तेन पाण्डुतात्यर्थं जाड्यं शिरःशोफश्च भवति। तृतीये मेदो दूषयति, तेन चक्षुर्ग्रहणं दन्तक्लेदः स्वेदो घ्राणाक्षिस्रावश्च भवति। चतुर्थे कोष्ठमनुप्रविश्य मन्यास्तम्भं शिरोगौरवञ्चापादयति। पञ्चमे वाक्सङ्गं शीतज्वरञ्च करोति। षष्ठसप्तमयोः पूर्व्ववदिति॥ भवन्ति चात्र। "धात्वन्तरेषु याः सप्त कलाः सम्परिकीर्त्तिताः। तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम्॥ येनान्तरेण हि कलां कालकल्पं भिनत्ति हि। समीरणेनोह्यमानं तत् तु वेगान्तरं स्मृतम्॥ शूनाङ्गः प्रथमे वेगे पशुर्ध्यायति दुःखितः। लालास्रावो द्वितीये तु कृष्णाङ्गः पीड्यते हृदि॥ तृतीये च शिरोदुःखं कण्ठग्रीवञ्च भज्यते। चतुर्थ वेपते मूढ़ः खादन् दन्तान् जहात्यसून्॥ केचिद्वेगत्रयं प्राहुरन्तश्चैतेषु तद्विदः॥ ध्यायति प्रथमे वेगे पक्षी मुह्यत्यतः परम्। द्वितीये विह्वलः प्रोक्तस्तृतीये मृत्युमृच्छति॥ केचिदेकं विहङ्गेषु विषवेगमुशन्ति हि। मार्जारनकुलादीनां विषं नातिप्रवर्त्तते"॥ इति। "पूर्व्वमुक्ताः शुक्रविषा मूषिका ये समासतः। नाम लक्षणभैषज्यैरष्टादश निबोध तान्॥ लालनः पुत्रकः कृष्णो हंसिकश्चिक्किरस्तथा। छुच्छुन्दरोऽलसश्चैव कषायदशनोऽपि च। कुलिङ्गश्चाजितश्चैव चपलः कपिलस्तथा। कोकिलोऽरुणसञ्ज्ञश्च महाकृष्णस्तथोन्दुरः। श्वेतेन महता सार्द्धं कपिलेनाखुना तथा। मूषिकश्च कपोताभस्तथैवाष्टादश स्मृताः॥ शुक्रं पतति यत्रैषां शुक्रघृष्टैः स्पृशन्ति वा। नखदन्तादिभिस्तस्मिन् गात्रे रक्तं प्रदुष्यति। जायन्ते ग्रन्थयः शोफाः कर्णिका मण्डलानि च। पिड़कोपचयश्चोग्रा विसर्पाः किटिमानि च। पर्व्वभेदो रुजस्तीव्रा ज्वरो मूर्च्छा च दारुणा। दौर्ब्बल्यमरुचिः श्वासोवमथुर्लोमहर्षणम्॥ दष्टरूपं समासोक्तमेतद् व्यासेन वक्ष्यते॥

अथातः कीटा उच्यन्ते—सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः। वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः॥ सर्व्वदोषप्रकृतिभिर्युक्ताश्चापरिणामतः। कीटत्वेपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः॥ कुम्भीनसस्तुण्डिकेरी भृङ्गी शतकुलीरकः। उच्चिटिङ्गोऽग्निनासा च चिच्चिटिङ्गो मयूरिका। आवर्त्तकस्तथोरभ्रसारिकामुखवैदलौ। शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः। शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः। अष्टादशेति वायव्याः कीटाः पवनकोपनाः॥ तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः॥ कौण्डिल्यकः

कलभको वरटी पत्रवृश्चिकः। विनासिका ब्रह्मणिका बिन्दुलो भ्रमरस्तथा। बाह्यकी चिप्पिटः कुम्भी वर्च्चःकीटोऽरिमेदकः। पद्मकीटो दुन्दुभिको मकरः शतपादकः। पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी। क्लीतः क्रिमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः। एते ह्यग्निप्रकृतयश्चतुर्विंशति-रीरिताः। तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः॥ विश्वम्भरः पञ्चशुक्तः पञ्चकृष्णोऽथ कोकिलः। सरेयकः प्रचलको वलभः किटिमस्तथा। सूचीमुखः कृष्णगोधा यश्च काषायवासिकः। कीटगर्द्दभकश्चैव तथा त्रोटक एव च। त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः॥ तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः॥३॥ तुङ्गीनासो विचिलकस्तालको बाहकस्तथा। कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः। तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा। अग्निकीटाश्च घोराः स्युर्द्वादश प्राणनाशनाः॥ तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्। तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः। क्षाराग्निदग्ध-वद्दंशो रक्तपीतासितारुणः। ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः। छर्द्द्यती-सारतृष्णाश्च दाहो मोहो विजृम्भिका। वेपथुश्वासहिक्काश्च दाहः शीतश्च दारुणम्। पिड़कोपचयः शोफो ग्रन्थयो मण्डलानि च। दद्रवः कर्णिका-श्चैव विसर्पाः किटिमानि च। तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः॥ येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत्। दूषीविषप्रकोपाच्च तथैव विष-लेपनात। लिङ्गं तीक्ष्णविषेष्वेतच्छृणु मन्दविषेष्वतः॥ प्रसेकोऽरोचकश्छर्द्दि-शिरोगौरवशीतताः। पिड़काकोठकण्डूनां जन्म दोषविभागतः॥ योगैर्नाना-विधैरेषां चूर्णानि गरमादिशेत्। दूषीविषप्रकाराणां तथैवाप्यनुलेपनात्॥ एकजातीनत ऊर्द्ध्वं कीटान् वक्ष्यामि भेदतः। सामान्यतो दष्टलिङ्गैः साध्या-साध्यक्रमेण च॥ त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः। चत्वार एते कलभा व्याख्यातास्तीव्रवेदनाः॥ तैर्दष्टस्य श्वयथुरङ्गमर्द्दो गुरुता गात्राणां दंशश्च कृष्णो भवति॥१॥ प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः। तथा निरुपमश्चापि पञ्चगौधेरकाः स्मृताः॥ तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्। रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः॥२॥ गलगोली श्वेता कृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येव षट्। ताभिर्दष्टे सर्षपिकावर्ज्जं दाह-शोफक्लेदा भवन्ति। सर्षपिकया हृदयपीड़ाऽतिसारश्च॥३॥ शतपद्यस्तु परुषा कृष्णा चित्रा कपिलिका रक्ता श्वेताऽग्निप्रभाचेत्यष्टौ। ताभिर्दष्टे शोफो वेदना दाहश्च हृदये। श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिड़कोद्-

पत्तिश्च ॥४॥ मण्डूकाः। कृष्णः सारः कुहकोहरितो रक्तो यववर्णाभो भृकुटी कोटिकश्चेत्यष्टौ। तैर्दष्टस्य दंशकण्डूर्भवति। पीतफेणागमश्च वक्त्रात्। भृकुटीकोटिकाभ्यामेतदव दाहश्छर्द्दिर्मूर्च्छा चातिमात्रम् ॥५॥ विश्वम्भराभिदष्टे दंशः सर्षपाकाराभिः पिड़काभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति ॥६॥ अहितुण्डिकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च ॥७॥ कण्डूमकाभिर्दष्टे पीताङ्गश्छर्दतिसारज्वरादिभिरभिहन्यते॥८॥ शूकवृन्तादिभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकश्चात्र लक्ष्यते ॥९॥ पिपीलिकाः। स्थूलशीर्षा सम्बाहिका ब्राह्मणिका अङ्गुलिका कपिलिका चित्रवर्णेति षट्। ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः ॥१०॥ मक्षिकाः। कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट्। ताभिदष्टस्य दाहशोफौ भवतः। स्थालिकाकाषायीभ्यामेतदव पिड़काश्च सोपद्रवा भवन्ति ॥११॥ मशकाः। सामुद्रः परिमण्डलो हस्ति मशकः कृष्णः पार्व्वतीय इति पञ्च। तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च। पार्व्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः। नखावकृष्टेऽत्यर्थं पिड़काः सदाहपाका भवन्ति ॥ जलौकसां दष्टलक्षणमुक्तं प्राक्। तद्यथा। जलमासामायुरिति जलायुकाः। जलमासामोक इति जलौकसः। ता द्वादश। तासां सविषाः षट् तावत्य एव निर्व्विषाः॥ तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा। वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्ब्बुरा। रोमशा महापार्श्वा कृष्णमुख्यलगर्द्दा। इन्द्रायुधवदूर्द्ध्वराजिभिश्चित्रिता इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति॥ ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूमूर्च्छा ज्वरो दाहश्छर्द्दिर्मदः सदनमिति लिङ्गानि भवन्ति ॥ तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्यः। इन्द्रायुधादष्टमसाध्यमिति षट् सविषा जलौकसः सचिकित्सा व्याख्याताः॥ भवन्ति चात्र। गोधेरकः स्थालिका च ये च श्वेताग्निसंप्रभे। भृकुटी कोटिकश्चैव न सिध्यन्त्येकजातिषु॥ शवमूत्रपुरीषैस्तु सविषैरवमर्षणात्। स्युः कण्डूदाहकोठारुःपिड़कातोदवेदनाः। प्रक्लेदवांस्तथा स्रावो भृशं सम्पाचयेत्त्वचम्॥ त्रिविधा वृश्चिकाः प्रोक्ता मन्दमध्यमहाविषाः। गोशकृत्कोथजा मन्दा मध्याः काष्ठेष्टिकोद्भवाः। सर्पकोथोद्भवास्तीक्ष्णा ये चान्ये विषसम्भवाः॥ मन्दा द्वादश मध्यास्तु त्रयः पञ्चदशोत्तमाः। दशविंशतिरित्येते सङ्ख्यया परिकीर्त्तिताः॥ कृष्णः श्यावः कर्ब्बूरः पाण्डवर्णो गोमूत्राभः

Indira Gandhi National
Centre for the Arts